Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीः ॥

॥ जयसच्चिदानंद ॥

॥ अथाद्वैतसाम्राज्यप्रारंभः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥ ॐ सर्ववादविदूरायस्वप्रकाशैकदीप्तये ॥ नित्यमुक्तायशान्तायप्रतीचेब्रह्मणेनमः ॥ १ ॥ यत्कृतेक्षाक्षणेनैवब्रह्मैवाहमितिप्रथा ॥ तस्मै श्रीसच्चिदानंदमूर्तयेगुरवेनमः ॥ २ ॥ श्रीमद्राजारामयतीन्द्रान्कविचन्द्रान्विद्वद्वादिद्विरदक्षोभेषुमृगेन्द्रान् ॥ आपन्नार्तित्राणेकरुणारससान्द्रान्वन्देविद्वद्गौरवदीक्षागततन्द्रान् ॥३॥ तच्छिष्याःप्रथिताश्चसन्तिबहुशोऽप्यासेतुसीताचलंतेषांमौलिमणीयमानचरणाबालाभिधाःशास्त्रिणः ॥ विद्याभिस्त्वनवद्यहृद्यकविभिर्गण्याश्चवाग्देवतास्वेतेषांस्मृतिरेवमंगलमिमंग्रंथंनयेत्पूर्णताम् ॥ ४ ॥ आबाल्याच्छास्त्रवेत्तृत्वाद्बालशाख्यभिधाजुषाम् ॥ भवेन्ममसहायश्चेद्ग्रन्थोऽयंविपुलीभवेत् ॥५॥ ऋतेगुरूपसत्तिंनज्ञानंकस्यापिजायते ॥ अतोवसिष्ठशिष्यायरामायास्तुनमोनमः ॥ ६ ॥ द्वैताद्वैतविचारकौतुकवशाद्विध्वस्तभेदःसुधीरद्वैतेपरिनिष्ठितःपरशिवःक्वाप्यस्तितस्मैनमः ॥ द्वैतध्वान्तसमुन्मिषद्दृगपरोमध्वादिनक्तंचरोभूयिष्ठःश्रुतियुक्तिभूतिरजसाप्रोत्सार्यतेफू-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्कृतैः ॥ ७॥ नकोपःकर्तव्योभवतिमहतांबालचरितेमुहुर्दृष्ट्वावृद्धाचरणमिहबालोऽ-
पियतते ॥ नतत्कर्तुंशक्तस्तदपिमहतांप्रीत्युदयतस्तदंकेसंवेशंफलमभिमतंचापिल-
 भते ॥८॥ इहखलुयथार्थप्रतिपत्तिहेतुश्रुतितात्पर्यंद्वैतनिन्दनादद्वैतदर्शनस्यमोक्षफल-
श्रवणादद्वितीयेब्रह्मण्येवेतिराद्धान्तोघाण्टापथिकः ॥ तत्रद्वैतवादिनःपृच्छयंते॥ ॐ श्रीः
द्वैतस्यसाधकंद्वैतमुताद्वैतंसखेवद ॥ आत्माश्रयत्वमाद्येस्यादेककोटिप्रसंगतः ॥ १ ॥
द्वितीयेस्वविरुद्धस्यसाधकंस्वंभवेत्कथम् ॥ नचण्डभानुस्तमसिमानंभवितुमर्हति॥ २ ॥
यत्सत्त्वेयदभावस्यनियतत्वंविरोधितत् ॥ भानुसत्त्वेतमःसत्त्वंकेनदृष्टंक्षितौवद ॥ ३ ॥
प्रत्यक्षादिप्रमाणानिद्वैतेसन्तीतिचेद्वद ॥ मानानिकेनसिद्धानिकिंतस्याप्यस्तिसाधकम्
॥ ४ ॥ अनवस्थादिदोषःस्यान्मानान्तरपरिग्रहे ॥ मानासिद्धानिचेत्तानिभ्रमोऽयमिति
भण्यते ॥५॥ भ्रमसिद्धेनयत्साध्यंसोऽपिभ्रमइतीष्यताम् ॥ ६ ॥ प्रमाणागोचराणाचे
त्सत्त्वंवन्ध्यासुतोऽपिसन् ॥ प्रमाणगोचरत्वंचेदुक्तदोषेनिमज्जसि ॥ ७॥ स्वतःप्रमाण-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूतेनसर्वस्यानुभवेनहि ॥ प्रमाणानिहिसिध्यन्तितैःसिद्धंद्वैतमक्षतम् ॥ ८॥ इतिचेदनु
भूतिस्तुनप्रामाण्यप्रयोजिका ॥ मेयस्यापिचमानत्वंभवेत्तवमतेतदा ॥ ९ ॥ येनरूपे-
णयज्ज्ञातंतत्तथेतिविनिश्चयः ॥ कर्तुनशक्यतेक्कापिरज्जुःसर्पायतेनहि ॥ १० ॥ मेय-
सिद्ध्यैवमानत्वंमानसिद्ध्यैवमेयता ॥ अन्योन्याश्रयदोषेणनसिध्येदुभयंतव ॥ ११ ॥
भ्रमप्रमासमानस्यानुभवस्यनकस्यचित् ॥ १२ ॥ साधकत्वंभवेन्नूनमतोमाना
न्तरंवद ॥ मानाभावात्प्रमाणानामसिद्धिरितिहेतुना ॥ द्वैतासिद्धिर्यदिभवेत्तावकी-
नमतेऽपिहि ॥ किंमानमद्वयेऽस्मिंश्चेद्वन्ध्यायास्तनयोऽपिकः ॥ १३ ॥ यदिस्या-
त्तनयस्तस्याःकथंवन्ध्येतिगीयते ॥ तनयेऽपिचवन्ध्याचेत्प्रश्नोऽयमुपपद्यते ॥ १४ ॥
मानमेयादिविरहेमीमांसामानगोचरा ॥ उपहासायतेभूयाद्वन्ध्यासुतइवाधुना ॥ १५॥
मानाभावादद्वयस्यनसिद्धिरितिचेत्तदा ॥ पुत्राभावान्नसिद्धिःस्याद्वन्ध्यायाअपितेमते
॥ १६ ॥ पुत्राभावःस्वरूपंचेन्मानाभावोऽपितस्यतत् ॥ शून्यवादप्रसंगश्चेच्छून्यंद्वैत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यमेमतम् ॥ १७ ॥ प्रमाणाभावतोद्वैतंशून्यमेवसमाविशेत् ॥ नाद्वैतशून्यतासातुभ-
वेन्मानादिसंभवे ॥ १८ ॥ यदन्यस्यप्रमाणानिनसहेतकथंनुतत् ॥ स्वस्मिन्सहेत
मानानिविवस्वानिवतत्तमः ॥ १९ ॥ तस्मात्तूष्णींतिष्ठवत्सतदेवाद्वैतमिष्यते ॥ नाज्ञा-
ननाशोमानस्यानंगीकारेभवेत्तव ॥२०॥ यत्रस्यान्मानसम्पर्कस्तत्राज्ञानंविनश्यति ॥
इतिचेन्मानसम्पर्कःकुत्रदृष्टस्त्वयावद ॥ २१ ॥ असिद्धानांहिमानानामसिद्धविषये-
षुचेत् ॥ सम्पर्कःस्नातिवन्ध्यायाःसुतोमृगजलोर्मिषु ॥ २२ ॥ स्नात्वात्वमपितत्रैवब्रह्म
मानंकिरोषिहि ॥ मृगवारिजलैश्वेत्स्युःशीताभानुमरीचयः ॥ २३ ॥ तदात्वन्मतमा-
नेनब्रह्मापिविषयीकृतम् ॥ मानमेयाद्यभावेतुसुषुप्तिस्तेमतेस्थिता ॥ २४ ॥ सत्यंतदा
सुषुप्तिःस्याद्यदिमानादिगोचरे ॥ निश्चयेसतिविश्रान्तिर्नतथेयंस्थितिर्मता ॥ २५ ॥
अवस्थात्रयसद्भावोमानाभावान्नसिध्यति ॥ इतिबोधःसुषुप्तिश्चेज्जन्मतेसफलीकृतम्
॥२६॥ विचारागस्त्यसम्पीतद्वैतनाम्निमहोदधौ ॥ चिन्तामणिर्मोक्षनामाकरएवस्थित-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तव ॥ २७ ॥ मानानंगीकारपक्षेव्यवहारउपप्लुतः॥ स्याच्चेत्त्वदंगकिरणान्मदनंगीकृते-
रथ ॥ २८ ॥ प्रवृत्तोवानिरुद्धोवाकिंत्वसावज्ञगोचरः ॥ मयासहविचारेणत्वदीयोयदिरु-
ध्यते॥२९॥ तर्हित्वमद्यमुक्तोऽसिश्रुत्याप्यंगीकृतोभवान्॥ पश्येत्केनचकंजिघ्रेद्विजानी-
याच्चकेनकम्॥३०॥ यत्रनान्यत्पश्यतीतिश्रुत्याप्रोक्तंनिरोधनम्॥व्यवहारोस्तिचेद्भूरिक-
रुणाभवतस्तदा॥३१॥अंगीकुरुष्वमानानिततोजीवंतुजंतवः ॥ अद्वैतनाम्निदीप्तेऽग्नौद्वै-
तिभिःशलभैरिव॥पक्षद्वयविलोपेनभस्मसाद्भूयतेऽधुना॥३२॥सच्चेन्नशाम्यतिकदाचन
दृश्यदुःखंदृश्येत्वशाम्यतिनबोद्धरिकेवलत्वम् ॥ दृश्येत्वसंभवतिबोद्धरिबोद्धृभावःशा-
म्येत्स्थितोऽपिहितदस्यविमोक्षमाहुः ॥३३॥अस्तुमानंभ्रमोऽस्माकंयथातवमतेश्रुतिः
मानमद्वैतकेतद्वद्द्वैतेमानानितानिहि ॥ ३४॥ इतिचेच्छृणुवेदस्यद्वैताभावेहिमानता ॥
नतद्वतियतोवक्तियतोवाचोनिवर्तनम्॥३५॥ द्वैतव्यावृत्तिपर्यन्तंवेदस्यव्यापृतिर्भवेत्॥
तन्निवृत्तौनिर्विशेषंशिष्यतेकेवलंपरम्॥३६॥शशिसंबंधशून्यापिशाखाशशिविबोधने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वारंनमानंतद्वत्स्याद्दैताभावःपरात्मनि ॥३७॥ असंगस्यचसम्बन्धोद्दैतेनाथेतरेणवा ॥
कथंभवेदतोवक्तिश्रुतिरव्यवहार्यताम्॥३८॥ अतस्त्वमेवचोद्योऽसिव्यवहारःकथंतव ॥
उपपन्नोनचेदस्मदिष्टंसिद्धंसुखीभव॥३९॥ द्वैताभावेश्रुतिंमानमुररीकुर्वतस्तव ॥ मान-
मेयव्यवहृतौनप्रश्नोऽस्त्युपपत्तिमान् ॥४०॥ इतिचेद्व्यवहारोऽसौत्वयैवांगीकृतस्ततः
॥ त्वन्मतेनोत्तरंदत्तंत्वद्बोधायनमेक्षतिः ॥ ४१ ॥ ननुमत्संमतेवेदेद्दैतमप्युक्तमस्तिहि
॥ तदेवमेमतंयस्मात्प्रत्यक्षमनुभूयते ॥ ४२ ॥ इतिचेद्ब्रूहिजगतोब्रह्मणोभेदउच्यते ॥
उतजीवादथान्योन्यंक्कस्माद्भेदसंभ्रमः ॥ ४३ ॥ ऐतदात्म्यमिदंसर्वंसर्वंब्रह्मेतिवा
क्यतः ॥ प्रपंचब्रह्मणोर्भेदोनिरस्तोऽस्तिनवावद ॥ ४४ ॥ नभेदःसृष्टिवाक्यार्थोभिन्न-
सृष्टेरसंभवात् ॥ यस्माद्भिन्नंयच्चलोकेतस्यकार्यंनतद्भवेत् ॥ ४५ ॥ स्तम्भकुम्भादिवत्त-
स्मात्प्रकृतौपंचमींस्मर ॥ अतएवध्रुवाद्यौरित्यादिश्रुतिसमन्वयः ॥४६ ॥ द्यवादीनांच-
कार्यत्वात्कार्याणांनाशदर्शनात् ॥ स्वतोध्रुवत्वायोगेनब्रह्मणाऽभेदइष्यताम् ॥ ४७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मैवध्रुवशब्दार्थःपरंध्रुवमितिश्रुतेः ॥ यस्मादभिन्नंयन्नस्यात्तस्यकार्यंनतद्भवेत् ॥४८॥
यथामृन्नमृदःकार्यमितिचेद्बुद्धिमान्भवान् ॥ अभिन्नत्वंचकार्यस्यश्रुत्यैवांगीकृतंयतः
॥ ४९ ॥ भवतापितदेष्टव्यंश्रुत्येकशरणेनहि ॥ अभिन्नत्वविरोधेनकार्यत्वंनेष्यतेयदि
॥ ५० ॥ तदाभ्रमानुवादेनकृतार्थाःश्रुतयोऽनघाः ॥ किंचप्रत्यक्षमानेनभेदभ्रुवचरेणहि
॥ ५१ ॥ प्रमाणान्तरसिद्धत्वादनुवादित्वमिष्यताम् ॥ भेदेऽभेदेऽपिकार्यत्वंनोपपन्नं
कथंचन ॥ ५२ ॥ व्याप्तिद्वयविरोधेनभ्रमइत्येववास्तवम् ॥ आरोपितस्याधिष्ठाना-
भेदोरज्जुभुजंगवत् ॥ ५३ ॥ हित्वाधिष्ठानमारोप्यमप्रसिद्धंयतस्ततः ॥ अधिष्ठानेस-
मारोप्यभेदोनास्तिकथंचन ॥ ५४ ॥ हित्वेदमर्थंरजतंनप्रतीयेतकेनचित् ॥ अतएववि-
जातीयभेदोऽपिचनिराकृतः॥५५॥हाटकस्थस्यरौप्यस्यभेदेऽप्यारोपितस्यतु ॥ नभे-
दोऽस्तीदमर्थेहिचैकासत्तातयोर्यतः॥५६॥ आरोपितंहाटकस्थमितिचेच्छृणुबुद्धिमन्-
अन्यत्वंकथंतत्रनिर्वाह्यंभवतावद ॥५७॥ अन्नत्यत्वंशुक्तिगतंरजतेभातिचेद्वद ॥ आप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पस्थादिदंभिन्नमभिन्नंवास्तिरूपकम्॥५८॥ अभिन्नंचेदापणस्थेऽत्रत्यत्वमुररीकृतम् ॥
नचायंरजतारोपःकिंत्वत्रत्यत्वकस्यसः॥५९॥नतेनसंप्रयोगोऽस्तिनारोपस्तत्रयुज्यते ॥

भिन्नंचेन्नूतनमेवेदमिदमर्थमृतेनहि ॥६०॥ तस्मान्नतस्यभेदोऽस्तीदमर्थेशुक्तिखण्डके ॥
धर्मारोपेऽपिधर्मोऽयंवास्तवाद्भिद्यतेनवा ॥६१॥ द्वितीयेवास्तवंतत्स्यात्प्रथमेऽभिनवं-
भवेत् ॥ समागतानिर्वचनीयख्यातिर्ममसंमता ॥ ६२॥ आरोपितत्वाभानेनभ्रांतस्या-
भेदविभ्रमः ॥ तस्याभिलापशब्दस्यनधर्मेलक्षणाभवेत् ॥ ६३ ॥ नभ्रान्तेर्गौरिवंदो-
षःस्वयंदोषोयतोभ्रमः ॥ धर्मारोपेऽपिनोभेदस्तद्ग्रहग्राह्यतायतः ॥ ६४॥ संसर्गारो
पपक्षोऽपिदत्तोत्तरइतिस्मर॥ तस्मान्नब्रह्मजगतोर्भेदोवक्तुंहियुज्यते॥ ६५ ॥ ब्रह्माभे-
दान्नजीवस्यभेदोऽस्तिजगतासह ॥ सुपर्णक्रतपानाख्यश्रुतिभ्यांभेदउच्यते॥ ६६ ॥
इतिचेद्ब्रूहिकस्त्वंभोजीवोब्रह्माथवेश्वरः ॥ जीवश्चेदीश्वराद्भिन्नोब्रह्मणोवाथमेवद ॥

॥६७॥ भिन्नश्चेदीश्वराद्ब्रूहिकोभेदेहेतुरंजसा॥ सर्वज्ञत्वादयोधर्माऐश्वरामयिनेतिचेत्

For Private and Personal Use Only

॥ ६८ ॥ सर्वज्ञईश्वरइतिब्रुवताज्ञातएवहि ॥ सर्वशब्दार्थकोनोचेद्व्यर्थताबुध्नशब्द
वत् ॥ ६९ ॥ प्रातिस्विकंनजानामीतिचेच्छब्दार्थविद्भवान् ॥ नवावदाद्येयत्किं-
चिद्वक्तिजानातितद्भवान् ॥ ७० ॥ नचेत्त्वमीश्वरेकंवाधर्मंसाधयितुंप्रभुः ॥ यदि
सर्वज्ञताजंविवदर्किंमेमनःस्थितम् ॥ ७१ ॥ इतिचेत्प्रश्नविषयस्तत्किंचेत्सकिमर्थकः ॥
कःकिंशब्दार्थइतिनप्रश्नःकिंतूत्तरंहितत् ॥ ७२ ॥ अस्तुसर्वज्ञतास्माकंसर्वकर्तृत्वकंक-
थम् ॥ इतिचेच्छक्यसर्वस्यकर्तृत्वंत्वयिचेश्वरे॥७३॥ अशक्यसर्वकर्तृत्वंनेश्वरेनापिच-
त्वयि ॥ नित्यसिद्धासर्जनेनयुक्तंशक्यविशेषणम् ॥ ७४ ॥ सत्यसंकल्पताचेशेमयिना-
स्तीतिचेद्वद ॥ संकल्पेवाथविषयेक्कवासत्यविशेषणम् ॥ ७५ ॥ त्वत्संकल्पेऽपिसत्यत्वं
नचेत्तत्रापिनास्तितत् ॥ येनैवहेतुनामिथ्यात्वत्संकल्पोविचारितः ॥ ७६ ॥ तेनैवहे-
तुनामिथ्यासभवेदीश्वरस्यहि ॥ कल्पितत्वंयदाहेतुरुभयत्रसमोऽस्तिसः ॥ ७७ ॥ ईश-
संकल्पसंशान्त्यालयश्श्रुतिसमन्वयः ॥ पुनःसंकल्पजननात्सृष्टिश्श्रुतिसमन्वयः ॥ ७८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उभयत्रैकसंकल्पोनित्यश्चेदीश्वरेभवेत् ॥ नित्यत्वंचनमिथ्यात्वविरुद्धंदृष्टमीश्वरे॥७९॥
त्वःसंकल्पःकल्पितश्चेत्कल्पनाकल्पितानवा ॥ आद्येऽनवस्थादोषःस्याद्द्वितीयेनित्य-
तेशवत् ॥८०॥ यादृगीश्वरसंकल्पस्तादृगेवतवापिहि ॥ यादृक्तवास्तिसंकल्पई-
श्वरस्यापितादृशः ॥ ८१ ॥ नासदासीदितिश्रुत्याप्रलयेसर्वनास्तिता ॥ श्रूयतेऽतः
परेशस्यनसंकल्पस्तदास्तिहि ॥ ८२ ॥ लयेलयस्यसंकल्पइतिचेन्नलयस्तदा ॥ कुतः
सर्जनसंकल्पस्तदानींसंभवेद्वद ॥ ८३ ॥ अतःकल्पितसंकल्पोमिथ्यैवभवतीश्वरे ॥
उक्तयुक्त्याकल्पितोऽपिनभवेन्मास्तुकाक्षतिः॥८४॥ नेश्वरंसाधयामोऽद्यभेदमात्रनि-
वारकाः ॥ विषयेस्वप्नतुल्येचसत्यवार्तानयुज्यते॥८५॥ सर्वज्ञसर्वकर्तृत्वेजीवसाधारणे-
मते ॥ अतोनेश्वरभेदस्तेब्रह्मभेदोऽपिनास्तिते ॥ ८६ ॥ सर्वज्ञत्वव्यापकत्वमल्पज्ञत्व-
स्यविद्यते ॥ नातोविरोधशंकापिकुतोजीवेशयोर्भिदा ॥ ८७॥ सत्यंज्ञानमनन्तेतिब्रह्म
लक्षणयोगतः ॥ ब्रह्मत्वमास्तांसर्वान्तर्यामितामयिनास्त्यतः ॥ ८८ ॥ ईशत्वंदुर्घटं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्येइतिचेच्छृणुबुद्धिमन् ॥ सर्वान्तर्यामिताकातेययेशत्वंहिदुर्घटम् ॥८९॥ व्यवहार नियंतृत्वमुतसत्ताप्रदातृता ॥ अधिष्ठानस्यधर्मोऽयंयाचसत्ताप्रदातृता ॥ ९० ॥ यत्स-त्तयेश्वरोऽयंतेसत्तावान्नस्वतस्तथा ॥ स्वीयदेहेन्द्रियादीनांनियंतृत्वंतवापिहि ॥ ९१ ॥ प्रतिस्थलंविभिन्नत्वात्सर्वार्थोऽनेकधाभवेत् ॥ यत्किंचित्प्रकृतंतत्तुसर्वशब्दार्थइष्यते ॥ ९२ ॥ स्वसर्वदेहेन्द्रियादेर्नियंतृत्वंयतस्त्वयि ॥ अतःसुघटमीशत्वंचिंतांमावहमावह ॥ ९३ ॥ किंचेश्वरः सर्वकर्ताभेदवादेकथंभवेत् ॥ यच्चजीवकृतंतत्तुनेश्वरेणकृतंतव ॥ ९४ ॥ तदभावान्नसर्वस्यकर्तास्यात्तदभावतः ॥ नस्यात्सर्वज्ञतातस्यसर्वान्त-र्यामितापिच ॥ ९५ ॥ अतोनेश्वरसिद्धिस्तेकथंभेदःप्रसाध्यते ॥ यदिजीवकृतंतेनकृतंस्यात्तत्कृतंकुतः ॥ ९६ ॥ नचजीवकृतंतस्मात्सर्वेषामपिचेशता ॥ क्षित्यंकुरादिकर्तृ-त्वंधर्मिग्राहकमानतः ॥ ९७॥ तावत्येवहिविज्ञत्वेकल्प्येसर्वज्ञताकुतः ॥ एतावताल्प-कर्तृत्वाज्जीवकोटौनिवेशितः ॥ ९८ ॥ अधिकज्ञत्वकर्तृत्वेनेश्वरत्वप्रयोजके ॥ आंशि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काज्ञत्वमेतस्यकोवावारयितुंक्षमः ॥ ९९ ॥ यदिस्यात्सर्वकर्तासजीवानांस्यादक-
र्तृता ॥ जीवास्युर्यदिकर्तारोऽन्यथासिद्धस्त्वदीश्वरः ॥ १०० ॥ घटादयःकुलाला-
दिकर्तृकानेश्वरंप्रति ॥ साकांक्षाअंकुराद्यास्तुभवन्त्वीश्वरकर्तृकाः ॥ १०१ ॥
सर्वात्मत्वात्सर्वकर्तासर्वज्ञःसुशकोमम ॥ त्वयैवाविद्ययास्वस्मिन्जगदारोपितंखलु
॥ १०२ ॥ अज्ञानबाधात्तद्बाधस्त्वमीशोभगवांस्ततः ॥ माण्डूक्येप्राज्ञमात्मानंप्रकृ-
त्येशत्वमुच्यते ॥ १०३ ॥ अपिदुर्घटमीशत्वंघटनीयंविचारतः ॥ ईशानन्त्यंभवेद-
स्मिन्मतेचेत्कथमस्तितत् ॥ १०४ ॥ संख्यातःपरिमाणाद्वाद्वितीयेत्विष्टमेवनः ॥ संख्यो-
पाधिग्रहग्राह्यानेशानन्त्यायकल्पते ॥ १०५ ॥ दशावतारभेदेननविष्णोर्दशतायथा ॥
दशानामपिविष्णुत्वंविष्णोरेकत्वमप्यथ ॥ १०६ ॥ एवंजीवानन्त्यमपिगतंहस्तान्वता-
र्किक ॥ तत्रतत्रव्यक्तचितातत्तद्भोगोहियुज्यते ॥ १०७ ॥ नतेनभोगसांकर्यंनवाज्ञानस्यसं
करः ॥ तेनभुक्तंमयानेतिनवक्तुंशक्यतेत्वया ॥ १०८ ॥ यतस्त्वमेवभोक्तासिसर्वोपाधिषुचै-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कळः ॥ अविद्ययाध्यास्यदातेंद्रियैर्भुक्त्वासिभोगवान् ॥ १०९ ॥ सर्वोपाधिनियंतृ
त्वात्सर्वज्ञत्वाच्चसर्जनात् ॥ ईशत्वंतवभोक्तृत्वादज्ञत्वाज्जीवतापिच ॥ ११० ॥ यइमं
मध्वदेत्यत्रजीवंप्रक्रम्यचाग्रतः ॥ ईशानंभूतभव्यस्येत्यभेदोक्तिःसमंजसा ॥ ११ ॥
असंगोदासीनचितईशितृत्वंनयुज्यते ॥ अतईशानशब्दस्यचेश्वरोऽर्थोनशुद्धचित् ॥
॥ १२ ॥ एतच्छब्देनोभयस्याध्यासाधिष्ठानमुच्यते ॥ तदेवपृष्टंब्रह्मेतितच्छब्देनोप
संहृतम् ॥ १३ ॥ जीवेशयोरभेदश्चेल्लक्षणातत्त्वमादिषु ॥ कथमाश्रीयतेयुष्मत्पूर्वाचा
यैर्विचारय ॥ १४ ॥ तत्रहेतुद्वयंविद्धित्वदध्यस्ताहिभिन्नता ॥ शुद्धेब्रह्मणिशब्दानां
शक्त्ययोगोद्वितीयकः ॥ १५ ॥ त्वदध्यस्ताभिन्नतातुत्वद्बोधप्रतिबंधिका ॥ अत-
स्त्वद्बोधनायैवलक्षणाप्रोच्यतेबुधैः ॥ १६ ॥ सर्वनाम्नांलक्षणानतैर्थिकेष्टेतिचेच्छृणु॥
ब्रह्मशक्यंनकस्यापिशब्दस्यभवितुंक्षमम् ॥ १७॥ निर्धर्मकत्वाच्छबलमीक्षादिजग
तःप्रभुः ॥ तदर्थस्त्वंपदार्थोऽपिदेहेंद्रियगणान्वितः ॥ १८ ॥ अशोधितत्वाच्छोधेतुत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 योरैक्यंसुषुप्तके ॥ अविद्योपाधिकोजीवोमायोपाधिर्महेश्वरः ॥१९॥ उपाधिभेदादन-
योर्नैकत्वमितिचेच्छृणु ॥ अविद्यैवहिमायास्याद्वचनानर्हरूपतः ॥१२०॥ अविद्यावर-
 कत्वेनाव्याकृतंबीजरूपतः ॥ तदेवाज्ञानमित्युक्तंप्रमाबाध्यत्वयोगतः ॥ २१ ॥ देहें-
द्रियगणाध्यक्षःसौषुप्तान्नविभिद्यते ॥ योऽहंसुप्तोऽभवंपूर्वंसोऽहंव्यवहृतौस्थितः ॥२२॥
इतिसार्वजनीनेयंप्रत्यभिज्ञाप्रदृश्यते ॥ बीजावस्थांयआपन्नोध्यस्येदंजगदात्मकः ॥
॥ २३ ॥ पुनर्ग्रसित्वाबीजाख्यइत्थमेवाप्रमंस्थितः ॥ कूर्मांगानिप्रविष्टानिकूर्मप्रो-
क्तानिकूर्मकः ॥ २४ ॥ प्रसारेमुखपादादिव्यवहारोनकूर्मभित् ॥ जगत्तथाविष्टबीजं
बीजमुक्तंचनिर्गमे ॥ २५ ॥ घटःपटोजीवईशइत्यादिव्यवहारभूः ॥ आदृत्यकूर्म
दृष्टांतंसत्कार्यमुपपादितम् ॥ २६ ॥ सर्वाधारःकालइतिवदतापीदमुच्यताम् ॥
सत्कार्यवादोनोकस्मान्नांगीकृतइतिस्वयम् ॥ २७ ॥ विशेषोऽन्यत्रयद्दृष्टंतदन्यत्रस्थितं
तव ॥ नित्यजात्याद्याश्रयत्वेतत्तद्व्यवहृतिर्भवेत् ॥ २८॥ आस्तामेतच्चसर्वात्मत्व-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेवजगदीश्वरः ॥ पृथग्देहाभिमानेनाच्छादितेश्वरतातव ॥ २९ ॥ विचारेत्वीश्वरत्वं तेकोवावारयितुंक्षमः ॥ नित्यंपरोक्षईशस्तुजीवोनित्यापरोक्षकः ॥ १३० ॥ तयोरै-क्यंकथंचेत्तेतथाध्यासोविचारतः ॥ त्वदध्यासाच्छत्त्ययोगाद्ब्रह्मप्रकरणादपि ॥३१॥ लक्षणातत्त्वमोर्युक्तातथैवासिपदस्यच ॥ लकारार्थानन्वयेनवाक्यंलक्षणयार्थवत् ॥ ३२ ॥ तदर्थोऽन्वेत्यभेदेनत्वमर्थेनत्वमर्थकः ॥ असर्थेनाप्यभेदेननान्यसंसर्गसंभ-वः ॥ ३३ ॥ अभेदस्तुनसंसर्गस्तत्त्वेषष्ठीभवेद्यतः ॥ विशेषणेविशेष्येचधर्मत्यागाद खंडता ॥ ३४ ॥ धर्मिमात्रस्यैकसत्तारूपोऽभेदोनखंडकृत् ॥ येत्वभेदेऽपिखंडत्व-भीत्याऽभेदंत्यजंतिहि ॥ ३५ ॥ धर्मिमात्रोपस्थितिरित्याहुर्मान्यायतोबुधाः ॥ उपस्थितेःप्रमात्वंचपदानांवाक्यतापिच ॥ ३६ ॥ कथंनिर्वाह्यतेब्रह्मपदादपिभवे-त्प्रमा ॥ मानाभावश्चतत्त्यागेनचमानमखंडता ॥ ३७॥ यतोबोधस्वरूपंतत्फलंबो-धस्यवाभवेत् ॥ घटोघटइतीवात्रनाभेदश्चेदलंशृणु ॥ ३८ ॥ तत्त्वंपदाभ्यांशबलावी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शजीवावुपस्थितौ ॥ अनेकरूपतस्तस्मान्नोक्तदृष्टांतसंगतिः ॥ ३९ ॥ नोपस्थित्यंतरं-
तत्रधर्मत्यागेऽपिचद्वयोः ॥ लक्षणाव्यवहारस्तुधर्मत्यागेनयुज्यते ॥१४०॥ नचवृत्त्यं-
तरंयेनरूपांतरमभीप्सितम् ॥ संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः ॥ ४१ ॥
अखंडैकरसत्वेनवाक्यार्थोविदुषांमतः ॥ प्रत्यग्बोधोयआभातिसोद्वयानंदलक्षणः ॥
॥ ४२ ॥ अद्वयानंदरूपश्चप्रत्यग्बोधैकलक्षणः ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्य-
दाभवेत् ॥ ४३ ॥ अब्रह्मत्वंत्वमर्थस्यव्यावर्तेततदैवहि ॥ इतिश्लोकत्रयेणार्यावाक्यवृ-
त्तावखंडताम् ॥ ४४ ॥ अभेदंचाभेदबोधफलंचाहुर्मनीषिणः ॥ त्वमर्थस्यचधा-
त्वर्थेनाभेदेऽपिनकर्मता ॥४५॥ फलाविशेषितासत्ताधात्वर्थोव्यापृतिर्नहि ॥ आरो-
पितव्यापृतित्वाद्धातुसंज्ञानबाध्यते ॥ ४६ ॥ उपाध्यभिव्यक्तियोगादारोपोपिऽहि
युज्यते ॥ उपाध्यभिव्यक्तिकर्तृब्रह्माभेदाद्घटादिच ॥ ४७ ॥ कर्तृस्याद्ब्रह्मविख्यातं
सत्तामात्रमितिश्रुतौ ॥ अस्तीत्येवोपलब्धस्यतत्त्वभावःप्रसीदति ॥ ४८ ॥ इतिश्रुति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रतःसत्तानव्यापारोविकारतः ॥ तत्त्वभावविरोधाच्चतस्मान्नैवास्तिकर्मता ॥ ४९ ॥
साधुत्वायैवपुरुषोयुष्मच्छब्दसमन्वयात् ॥ पुरुषाऽर्थोस्तुचैकत्वंसत्तायामन्वितंभवेत्
॥ १५० ॥ इतिकेचित्तन्नयुक्तंनसंख्यानिर्विशेषके ॥ एकमेवाद्वयमितिकथमादौवि-
शेषणम् ॥ ५१ ॥ इतिचेदद्वितीयत्वंसंख्यापक्षेविरुध्यते ॥ संख्यापिसद्वितीयत्वा-
द्द्वयेनविरुध्यते ॥ ५२ ॥ विरोधादुभयोरेवकारोपिचविरुध्यते ॥ तस्माद्भेदत्रयाभावो-
वाक्यार्थोन्वेतिवैसता ॥ ५३ ॥ अभावात्सद्वितीयत्वंनाभावोनाश्रयात्पृथक् ॥
निर्विशेषप्रकरणाल्लक्षणातत्त्वमोरपि ॥ ५४ ॥ जडकारणताबोधबाधायेक्षादिसंकथा ॥
कार्यकारणभेदापहत्यैसर्वात्मताकथा ॥ ५५ ॥ आरोपितत्वमीक्षादेःसतिसत्य-
विशेषणात् ॥ एकज्ञप्तेःसर्ववित्तिसिद्धयेतत्वमोःकथा ॥ ५५ ॥ महावाक्यार्थबोध-
स्यप्रमात्वान्मोक्षयुक्तता ॥ ननुचाव्याकृतेभेदत्रयाभावोहियुज्यते ॥ ५६ ॥
तस्माच्चशबलंब्रह्मप्रकृतंनतुशुद्धसत् ॥ इतिचेत्सत्यमितिचतद्व्यावृत्त्यर्थमिष्यते ॥५७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालांतरेबाध्यतेतद्विचारेणापिबाध्यते ॥ कथंस्यात्सत्यतातस्यब्रह्मैवप्रकृतंततः ॥५८॥
पदत्रयंलक्षयित्वाऽस्यर्थैनैक्यंवदंतिये ॥ तेषामभिप्रायएषोस्यर्थोऽभेदान्नभिद्यते ॥
॥ ५९ ॥ एकसत्तात्वभेदःस्यात्तद्व्यक्तित्वंतदेवहि ॥ नेयंवैशेषिकीसत्ताजात्यादिष्वपि
भासनात् ॥ १६० ॥ संसर्गेचैकताभानंनब्रह्माद्वैतकारणम् ॥ संसर्गैकत्वमुभयोःसाम-
रस्यप्रयोजकम् ॥ ६१ ॥ तथाग्रहश्चेद्भवतुचैकत्वमुपलक्षणम् ॥ अस्यर्थस्यचसंसर्ग
रूपभानेपिनक्षतिः ॥ ६२ ॥ अभेदोनित्यइत्यादौतथोदाहृतिदर्शनात् ॥ लक्ष्यत्रयैक्य
बोधोयंनवाचांविषयोभवेत् ॥ ६३ ॥ निर्धर्मिवस्तुकेनापिसुशकंनाभिभाषितुम् ॥
अतिव्युत्पन्नमतिनावाक्यार्थोबुध्यतेतथा ॥ ६४ ॥ वक्तुंनशक्यतेतस्मान्नसत्तन्नास
दुच्यते ॥ इत्याहभगवान्साक्षात्सर्वज्ञोप्यर्जुनंप्रति ॥ ६५ ॥ इत्थंलक्षणयास्तंभ-
कुंभयोरेकताभवेत् ॥ इतिचेद्धर्मिभेदेननैकतास्तिसमंजसा ॥ ६६ ॥ भिन्नरूपो
पस्थितस्यधर्मिणस्त्वैक्यमिष्यते ॥ यत्रधर्मिद्वयंतत्रकथमैक्यंभवेद्वद ॥ ६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मिभेदेप्यभेदश्चेल्लक्षणोक्तिर्नयुक्तिभाक् ॥ अत्रप्रकरणादेकंब्रह्मसद्धर्मितत्रहि ॥६८॥
ईक्षादिकर्ताभगवानज्ञोभोक्ताचजीवकः ॥ आरोपितौतयोरैक्यंतत्त्वमित्याहचश्रुति
॥ ६९ ॥ आरोपितत्वमैक्यस्यबोधात्सिध्यतितत्त्वमोः ॥ अविरोधःकुतोनस्यादिति
चेच्छंवयतेत्वया ॥ १७० ॥ विरोधंनवयंब्रूमस्त्वयाध्यस्तोस्तिसुस्थिरः ॥ प्रकृतार्थ
परामर्शितत्पदंलक्षितंभवेत् ॥ ७१ ॥ लक्षणात्वंपदस्यात्रनप्रयोजनमर्हति ॥ घटत्वा
दिविशिष्टस्यमृदभेदोयथातथा ॥ ७२ ॥ सविशेषेनिर्विशेषाभेदोभवतिसांप्रतः ॥
इतिचेत्परिणामोयंजीवोनब्रह्मणोभवेत् ॥ ७३ ॥ तथाचेत्कालवशतोनाशोनास्तिक
जीववत् ॥ नापिधर्म्यंतरंजीवस्तत्वमैक्यविरोधतः ॥ ७४ ॥ नैक्यज्ञानमुपासार्थं
सर्वज्ञानविरोधतः ॥ अतोविवर्तोजीवोनबाधाभेदेमृषाभवेत् ॥ ७५ ॥ नस्यान्मो-
क्षसुखंतस्यमृषात्वाच्छोकमावहेत् ॥ धर्मत्यागाद्धर्मिणैक्यसिध्यर्थंलक्षणात्वमः ॥
॥ ७६ ॥ तदैवमुख्यमैक्यंस्यादहंब्रह्मेत्यबाधितम् ॥ देहादिवन्नजीवोयंधर्म्यध्यस्तो-

For Private and Personal Use Only

स्तिचित्प्रभे ॥ ७७ ॥ किंतुप्राणादियोगेनजीवत्वाध्यासइष्यते ॥ औपाधिकत्वा-
न्मिथ्यातद्ब्रह्मत्वंवास्तवंमतम् ॥ ७८ ॥ उपाधीनांतुमिथ्यात्वंवाचारम्भणवाक्यतः ॥
तस्मादीश्वरभेदोनब्रह्मभेदोपिनास्तिते ॥ ७९ ॥ द्वासुपर्णेत्यादिमंत्रास्त्वद्भ्रमेणैवसा-
र्थकाः ॥ प्रत्यक्षंवदकीदृक्केकंभेदमवगाहते ॥ १८० ॥ जीवेशयोश्चेज्जीवेशौनेंद्रियार्थौ
स्वयंप्रभौ ॥ कथंभेदस्तयोःस्वीयप्रत्यक्षपथमर्हति ॥ ८१ ॥ येनेंद्रियेणयद्ग्राह्यंतत्र-
भेदोपितेनवै ॥ विरुद्धधर्माक्रांतिश्चनहेतुरुपयुज्यते ॥ ८२ ॥ नचप्रात्यक्षिकंज्ञानं
हेतूपन्यासमर्हति ॥ हेतूपन्यासतोभेदःसाध्यश्चेदनुमाभवेत् ॥ ८३ ॥ दृष्टांत
स्तत्रवक्तव्योघटादिःसर्वएवहि ॥ घटादिसर्वभिन्नत्वादभेदोपिभवेत्तदा ॥ ८४ ॥
व्यतिरेकेघटादिस्तुदृष्टान्तःस्वयमूह्यताम् ॥ किंचेश्वरोजीवभिन्नःसर्वज्ञत्वादितित्वया
॥ ८५ ॥ वक्तुंनशक्यतेतत्रदृष्टांताभावयोगतः ॥ एवंजीवेपीशभेदोऽज्ञत्वाद्धेतोरपि
त्वया ॥ ८६ ॥ दुःसाधोहेतुनातेनाभेदोपिस्याद्यथाक्रमम् ॥ विरुद्धधर्मसिद्धिश्च

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेदसिध्याभवेत्तव ॥ ८७ ॥ भेदसिद्धिस्तदैवस्याद्विरुद्धाक्रांतिसंभवः ॥ किंचजी-
वाभिन्नईशोज्ञत्वाद्रामादिवद्भवेत्॥८८॥इत्थमेवेश्वराभिन्नोजीवोपिभवितुंक्षमः ॥ईश्व-
रेप्यज्ञतापत्तिरितिवक्तुंनशक्यते॥८९॥सर्वात्मत्वादज्ञतापियुक्तैवपरमात्मनः॥१९०॥
सर्वज्ञताल्पज्ञतयोर्विरोधोनकथंचन । सर्वज्ञत्वव्यापकत्वमल्पज्ञत्वस्यदृश्यते ॥ ९१ ॥
स्वाध्यस्तसर्ववेत्तृत्वंसर्वस्यापिहिविद्यते ॥ स्वानध्यस्तानभिज्ञत्वमपिसर्वस्यविद्यते
॥ ९२ ॥ यदीश्वरोजीवभिन्नस्त्वमेवांगीकरोषितत् ॥ ९३ ॥ यद्यभिन्नस्तदास्वीय-
मताद्विप्रच्युतोभवान् ॥ यत्रेश्वरेजीवभेदःसाध्यस्तंवेत्सिवानवा ॥ ९४ ॥ आद्येकिं
विषयत्वेनाथवास्वत्वेनवावद ॥ विषयत्वेतुमिथ्यात्वंस्वत्वेभेदःकथंभवेत् ॥ ९५ ॥
नवेत्सिचेद्भेदसिद्धिःकथंवाक्रियतेत्वया ॥ अनेनैवप्रकारेणजीवभेदोऽपिधिक्कृतः ॥९६॥
उपाधिभेदग्राह्यत्वाज्जीवभेदोनवास्तवः ॥ मणिभेदान्नसूत्रस्यभेदोमालासुदृश्यते ॥

१ चेदितिशेषः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ९७ ॥ मणिवैचित्र्ययोगेनचेत्सूत्रेभेदविभ्रमः ॥ मिथ्यैवभवितुंयुक्तःकेवलेतदद-
र्शनात् ॥ ९८॥ स्वप्नेजाग्रतिदृष्टोऽपिभेदोनास्तिसुषुप्तके ॥ जीवस्तस्मादेकएवसर्वो-

पाधिविलासवान् ॥ ९९ ॥ नोपाधिसंपरित्यागःसुषुप्तेप्यस्तियेनहि ॥ जीवस्यकेव-
लीभावोयेनस्याद्भेदविभ्रमः ॥ २००॥ इतिचेदस्तितोपाधेःकेनदृष्टासुषुप्तके ॥ त्वये
तरेणवाचाद्येसुषुप्तिस्तेकथंभवेत् ॥ १ ॥ दृष्टोपाधेस्त्वयादृष्टोनवाब्रूहिसुषुप्तके ॥
कथंसुषुप्तिर्दृष्टश्चेन्नचेत्सत्तोपधेःकथम् ॥ २ ॥ मदीयसुप्तिसमयेयोजाग्रत्तत्कथाव-
शात् ॥ उपाधिसत्ताचेत्तर्हितज्जाग्रत्केनसिध्यति ॥ ३ ॥ तज्जागृतिस्त्वयादृष्टा
चेत्त्वंजाग्रन्नसुप्तिमान् ॥ तस्मात्तादृक्त्वदध्यासस्तस्मात्सत्यंजगन्नहि ॥ ४ ॥ अध्य
स्तंजगदादायनकिंचित्तवसिध्यति॥ महाह्रदेयथावन्हिर्धूमाभासान्नसिध्यति ॥ ५ ॥
मानमेयव्यवहृतेःसंभवाभावतःखलु ॥ अध्यस्तत्वंत्वयेष्टव्यंनचारंभादिसंभवः ॥ ६ ॥
कार्यकारणयोर्भेदआरंभेसंमतोनवा ॥ नचेदप्रत्यक्षतास्यादप्रत्यक्षाण्वभेदतः ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुल्यःसांख्येऽप्ययंदोषःकिंचापरमिमंशृणु ॥ स्वकार्यत्वंस्वहेतुत्वंनैकधर्मिणिसंभवेत् ॥ ८ ॥ आद्येनकारणंकार्यमितिवक्तुंनयुज्यते ॥ मृत्कार्यस्यकपालस्यघटकारणतायतः ॥ ९ ॥ घटहेतोःकपालस्यमृत्कार्यत्वस्यदर्शनात् ॥ नकार्यंकारणमितिनवक्तुंसुशकंतव ॥ १० ॥ यत्तच्छब्दनिवेशेतुदोषोननुगमोभवेत् ॥ कार्यकारणतावच्छेदकरूपेणचेद्भिदा ॥ ११ ॥ अवच्छेदकधर्मस्यभेदःस्यान्नतुधर्मिणः ॥ अवच्छेदकधर्मस्यभेदोऽपिचनसिध्यति ॥ १२ ॥ उभयावच्छेदकत्वंकपालत्वस्यदृश्यते ॥ यत्तच्छब्दनिवेशेतुदोषोननुगमोभवेत् ॥ १३ ॥ अस्तुवाधर्मभेदोऽयंनधर्मिद्वैतसाधकम् ॥ कपालकंनकलशइतिख्यात्याविभिन्नता ॥ १४ ॥ कल्पनीयेतिचेत्केनावच्छिन्नाप्रतियोगिता ॥ कपालकलशत्वाभ्यांचेत्त्वदुक्तोनसिध्यति ॥ १५ ॥ द्वयोपलक्षितत्वंतुप्रत्येकस्यापिविद्यते ॥ कार्यस्वकारणाद्भिन्नमितिवक्तुंनशक्यते ॥ १६ ॥

१ कार्यकारणयोः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कार्यमेवस्वशब्दार्थउक्तदोषःस्थितस्ततः ॥ तस्माद्भिन्नमभिन्नंवाकार्यंवक्तुंहिदुःशकम्
॥ १७ ॥ तस्मान्मिथ्यैवविश्वंस्यात्कस्यवासाधकंभवेत् ॥ अकार्यंचेत्सर्वयत्नवैय्य-
र्थ्यापत्तिरापतेत् ॥ १८ ॥ विश्वनिष्ठञ्चमिथ्यात्वंसत्यंमिथ्याथवावद ॥ आद्येद्वैतं
द्वितीयेतुजगत्सत्यत्वमापतेत् ॥ १९ ॥ इतिचेच्छृण्वनिर्वाच्यस्थितोधर्मोऽपितादृशः ॥
वंध्यापुत्रस्थिताधंर्मास्तादृशाएवनान्यथा ॥ यावन्मिथ्यावस्तुभाविमिथ्यात्वंदृश्यव-
स्तुनः ॥ २२० ॥ मिथ्यात्वस्यापिमिथ्यात्वेसत्यत्वंनहिसिध्यति ॥ तथासत्यविरो-
धित्वंतथातुच्छविरोधिता ॥ २१ ॥ सदसद्भिन्नभिन्नत्वेसदसपदूतास्थिरा ॥ इदमेव-
त्वनिर्वाच्यमुच्यतेब्रह्मवादिभिः ॥२२॥ मिथ्यावस्तुनिवृत्त्यैवनिवृत्तंयद्भवेत्ततः ॥ नद्वै-
तमप्रसिद्धत्वादन्योन्यंशुक्तिरौप्यवत् ॥ २३ ॥ किमत्रबहुनोक्तेनग्राह्यसंभावनानहि॥
यत्किंचिद्गृह्यतेतत्तुज्ञानयोगेनगृह्यते ॥ २४ ॥ ज्ञानेज्ञेयस्यसंबंधोविषयित्वंनचापरः॥ ॥१२॥
तन्नस्वरूपंज्ञानस्यसर्वतैर्थिकसंमतम् ॥ २५ ॥ भिन्नत्वेकल्पनीयंस्यात्सम्बन्धान्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रमप्यथ ॥ अनवस्थादिदोषःस्याज्ज्ञानाभिन्नंजगत्ततः ॥ २६ ॥ ज्ञानंज्ञेयमितिद्वेधा-
पदार्थोऽस्तिनचेतरः ॥ इतरत्वेतुच्छतास्याज्ज्ञानत्वेतुमदिष्टता ॥ २७ ॥ ज्ञेयत्वेज्ञान-
सम्बन्धोनस्यात्तस्मान्नतेगतिः ॥ इदमेवहितादात्म्यंज्ञानस्यज्ञेयवर्गके॥२८॥ यत्स्वा-
तिरिक्तसम्बन्धासम्भवोऽस्तिविचारिते ॥ ज्ञानस्याखण्डरूपस्यनिर्विकल्पस्यनोभवेत्
॥ २९ ॥ जगद्विकल्पनारूपंतस्मान्मिथ्याजगत्स्मर ॥ तच्चज्ञानंस्वप्रकाशंसर्वग्राह-
कतायतः ॥२३० ॥ ग्राह्यबाधेसर्वशास्त्रतात्पर्यंज्ञेयमादरात् ॥ नचशास्त्रसहस्रेण-
पदार्थःक्रियतेऽन्यथा ॥ ३१ ॥ तस्मादेकार्थतायुक्ताशास्त्राणांबुधसंमता ॥ यथार्थ-
वक्तावेदोऽसौनानात्वंधिक्करोतिहि ॥ ३२ ॥ प्रशंसतिनचद्वैतमद्वैतंचप्रशंसति ॥
तस्माद्यथाधिकारंहिशास्त्रवृत्तिःसमंजसा ॥ ३३ ॥ स्वयंप्रकाशेप्रज्ञानेसर्वप्रत्यक्स्व-
रूपके ॥ सर्वावभासकेभेदोनकथंचनयुज्यते ॥ ३४॥ भेदग्रहश्चानुयोगिप्रतियोगि-
ग्रहोद्भवः ॥ स्वप्रकाशस्यग्राह्यत्वाभावाद्भेदग्रहोनहि ॥ ३५ ॥ ज्ञानंचयदिभिद्येतभे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दस्यग्राहकोस्तिकः ॥ गृहीतायदिभिद्येतजडोगृहणातिकिंकथम् ॥ ३६ ॥ ज्ञानस्य
जडतापत्तिर्ग्राह्यत्वाच्चघटादिवत् ॥ गृहीताज्ञानभिन्नत्वाज्जडएवभवेत्खलु ॥ ३७॥
जडोऽपिचगृहीताचेद्धटादीनांचतद्भवेत् ॥ उभयोर्जडताचेत्स्याज्जगदांध्यंभवेत्तदा ॥
॥ २३८ ॥ स्वयंप्रकाशताक्कापिमंतव्याभवताततः ॥ यश्चस्वयंप्रकाशःस्यात्तज्ज्ञानं
स्वयमुच्यते ॥ ३९ ॥ परप्रकाशआत्माचेज्ज्ञानवानहमित्यपि ॥ नवक्तुंशक्यतेतेन
घटतुल्यजडेनहि ॥२४०॥ जडोपिचेत्तथाविंद्याद्घटोपिगुणवानहम् ॥ इतिविद्याच्च
ननुसज्ञानाभावान्नवेत्तिचेत् ॥ ४१ ॥ त्वयिज्ञानंकेनसिद्धंज्ञानेनाथेतरेणवा ॥ आद्ये
स्वसाधकेज्ञानेदोषआत्माश्रयोभवेत् ॥ ४२ ॥ अनवस्थादिदोषःस्याज्ज्ञानांतरपरि-
ग्रहे ॥ द्वितीयेतद्द्वितियंतुस्वेनान्येनोतसिद्धिभाक् ॥४३ ॥ पक्षद्वयेप्युक्तदोषास्तस्मा
दात्मास्वयंप्रभः ॥ ज्ञानरूपोनित्यसिद्धोभ्युपगंतव्यएवते ॥४४॥ उत्पद्यतेचात्ममनः
संयोगाज्ज्ञानमात्मनि ॥ इत्याहतस्यचांध्यंस्यान्मध्येज्ञानविनाशतः ॥ ४५ ॥

ज्ञानांतरोत्पत्तिनाश्यंज्ञानंचेन्नोपपत्तिमत् ॥ प्राक्संयोगात्तदुत्पत्तिःसंयोगांतरतोथवा
॥४६॥ आद्येतुसर्वज्ञानानांयौगपद्यंभवेत्तव ॥ द्वितीयेप्यणुमात्रेतुनसंयोगांतरोद्भवः
॥ ४७ ॥ स्वावच्छेदेनसंयोगांतररोधित्वयोगतः ॥ निष्प्रदेशेचात्मनिचनसंचारस्य-
संभवः ॥ ४८॥ संयोगश्चविभागश्चयेनस्तःसोपपत्तिकौ ॥ सप्रदेशत्वपक्षेतुनित्यत्वं-
नात्मनोभवेत् ॥ ४९ ॥ निष्प्रदेशेपिचाकाशेयथास्तेपक्षिणांगतिः ॥ मनोगति-
स्तथाचेत्किमाकाशंदृश्यतेत्वया ॥ ५० ॥ येनदृष्टांतसिद्धिःस्यात्किंचसंचारसंभवः ॥
मनसोनभवेत्क्वापिपादपक्षाद्यभावतः ॥ ५१ ॥ सुषुप्तौचरमज्ञाननाशोनस्यात्कथं-
चन ॥ पुरीतदांतरज्ञानान्नाशोनैवोपपत्तिमान् ॥ ५२ ॥ सामानाधिकरण्यस्याभा-
वात्किंचादराच्छृणु ॥ भावावगाहितज्ञानमुताभावावगाहिवा ॥ ५३ ॥ आद्येनस्या-
त्सुषुप्तिःसाद्वितीयेप्रतियोगिनम् ॥ विनिर्मुच्याभाववित्तिर्नदृष्टाक्वापिकेनचित्॥५४॥
प्रतियोगिज्ञानपक्षेनसुषुप्तिर्भवेत्तुसा ॥ येनेंद्रियेणयद्ग्राह्यंतदभावोपितेनहि ॥५५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्थंनियमसद्भावादभावग्रहणंकथम् ॥ इंद्रियाणांहिसंयोगेजागृतिःस्यान्नसुप्तता ॥
॥ ५६ ॥ तस्माच्चचरमज्ञाननाशोनैवोपपद्यते ॥ पुरीतदंतःसंयोगान्नाशश्चेज्ज्ञान-
नाश्यता ॥ ५७ ॥ गतातथाचरमताकथंसिध्यतितद्वद ॥ नाशाच्चरमतासिद्धि-
श्चरमत्वाच्चनाश्यता ॥ ५८ ॥ इत्थमन्योन्याश्रयतादोषान्नाशोनसिध्यति ॥ संयो-
गांतरसिध्यर्थंव्यापारश्चेष्यतेनवा ॥ ५९ ॥ आद्येव्यापारसमयेपूर्वसंयोगनाशतः ॥
ज्ञाननाशोभवेन्मध्यआंध्यंदुर्वारमेवहि ॥२६०॥ द्वितीयेपिचसंयोगांतरासंभवतःखलु ॥
ज्ञानोत्पत्तिर्नसिध्येच्चतेनचेद्युगपद्भवेत् ॥ ६१ ॥ परस्परविरोधेनयुगपन्नाशिता-
भवेत् ॥ अविरोधेतुतिष्ठेच्चगतानाशीयहेतुता ॥ ६२ ॥ चिद्रूपआत्मनितथासांशेंतः-
करणेपिच ॥ कःक्लेशोज्ञाननिष्पत्तिःकथंचेच्छृणुतत्क्रमम् ॥ ६३ ॥ देहोत्पत्ति
विनाशाभ्यामात्मोत्पत्तिविनाशकौ ॥ यथातथाबुद्धिवृत्तिनाशोत्पत्तिभिरिष्यते ॥
॥ ६४ ॥ तदभिव्यक्तियोगेनव्यवहारोस्तिलौकिकः ॥ अन्यथात्वात्मनित्यत्वंव्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वहारंचलौकिकम् ॥ ६५ ॥ कथंचनिर्वाहयसितस्मादात्मैवचित्प्रभः ॥ सच्चिदानंद
गुणकंब्रह्ममध्वावगच्छसि ॥ ६६ ॥ गुणाद्भिन्नमभिन्नंवातद्ब्रह्मप्रतिपादय ॥ भिन्नंचे
ज्जडतापत्तिरभिन्नंचेच्चिदेवहि ॥ ६७ ॥ चिद्भिन्नत्वेचजडतासद्भिन्नत्वेचतुच्छता ॥
सुखभेदेदुःखतेतिदोषत्रयमुदाहृतम् ॥ ६८ ॥ चिद्भिन्नत्वेपिचिद्वत्त्वान्नजडत्वंवदे
द्यदि ॥ सद्भिन्नत्वेनतुच्छत्वाच्चिद्वत्तानहिसंभवेत् ॥ ६९ ॥ सुखवत्तापितद्वत्स्यात्तु-
च्छेसर्वमसंभवि ॥ जीवसाधारणाएतेभवतःसंमतानवा ॥२७०॥ जीवसाधारणत्वेतु-
ब्रह्मलक्षणताकथम् ॥ असाधारणपक्षेतुजीवस्यजडतातथा ॥ ७१ ॥ तुच्छतादुः-
खताचेतिमोक्षोऽपिचनसंभवेत् ॥ तल्लक्षणंपूर्णताचेदाकाशस्यापिदृश्यते ॥ ७२ ॥
प्रत्यक्त्वंचेदस्तिजीवेनश्रुतंलक्षणांतरम् ॥ ज्ञानानांतारतम्यंचवदन्संपृच्छ्यतेमया ॥
॥ ७३ ॥ न्यूनाधिकग्राहकत्वमुतसर्वैकदेशिता ॥ आद्येगृध्रोदूरदृष्टिस्त्वत्तोधिकतरो
भवेत् ॥ ७४ ॥ मंदेंद्रियःपंडितश्चबालान्न्यूनतरोभवेत् ॥ द्वितीयेदेशवत्त्वेननाशः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यादात्मनामपि ॥ ७५ ॥ उज्ज्वलानुज्ज्वलत्वेतुनशक्येकल्पितुंत्वया ॥ तेकिंस्वा-
भाविकेनोवास्वभावश्चेदलंशृणु ॥ बालोनपंडितःस्यात्तेनचेद्भेत्वंतरंभवेत् ॥ ७६ ॥
उपाधौतारतम्यंस्यान्नज्ञानेस्यात्कथंचन ॥ विष्णुःसर्वोत्तमइतिवदन्नप्यत्रपृच्छयेत
॥ ७७ ॥ कोवास्याद्विष्णुशब्दार्थोजडश्चिद्वाथमेवद ॥जडश्चतुर्भुजोदेहोव्यापकोनैव-
संभवेत् ॥ ७८ ॥ चैतन्येव्यापकेदेहोनकथञ्चनयुज्यते ॥ देहाभावादुत्तमतादुर्नि-
रूपाभवेत्तव ॥ ७९ ॥ चिज्जडैक्यंवास्तविकंनकथञ्चनसिध्यति ॥ जडस्यचित्त्वा-
पत्तिःस्याच्चितश्चजडतापिच ॥ २८० ॥ विरोधादुभयंनस्यादनिर्वाच्यत्वमापतेत् ॥
नतज्जडंकिंतुमायाकल्पितंचिन्मयंभवेत् ॥ ८१ ॥ इतिचेत्परिणामेतुविकारित्वंस-
मापतेत् ॥विवर्तेतुमतात्स्वीयात्प्रच्युतिस्तवसंभवेत् ॥ ८२ ॥ सदातनत्वाच्चक्रा-
ब्जपाणिमूर्तिर्नमायिकी ॥ इतिचेद्रामकृष्णाद्यानूत्नावाथसदातनाः ॥ ८३ ॥ स-
दातनत्वेऽवतारशब्दोनस्याच्चतेषुतु ॥ नूत्नत्वेपरिणामोवाविवर्तोवाथमेवद ॥ ८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आद्येचितोवामूर्तेर्वापरिणामोभवेद्दद ॥ चितस्तुपरिणामेऽपिनाशापत्तेर्नसांप्रतम्
॥ ८५ ॥ द्वितीयेमूलमूर्तेश्चस्वरूपेणकथंस्थितिः ॥ अचिंत्याशक्तिरीशस्यतयारा-
मादिसंभवः ॥ ८६ ॥ इतिचेन्मन्मतामायाकुतोनस्वीकृतात्वया ॥ सतीत्वेशक्ति-
तानस्यात्स्तम्भेकुंभेक्कशक्तिता ॥ ८७ ॥ असतीशशशृंगा भाकथंवास्वीकृतात्वया ॥
उक्तोभयविरुद्धाचेत्सैवमायाप्रकीर्तिता ॥ ८८ ॥ तयारामादिसृष्टिश्चेज्जगत्सृष्टिः-
कुतोनहिं ॥ रामादीनामभिन्नत्वेजगतोऽपिकुतोनहि ॥ ८९ ॥ अभिन्नत्वेतुसर्वा-
त्माह्येकएवहरिःस्थितः ॥ कथंसर्वोत्तमत्वंस्यादेकवस्तुनिनिर्द्वये ॥ २९० ॥ सर्व-
पुरुषएवेतिप्रोक्तंपुरुषसूक्तके ॥ बलाबलविचारेतुशिवाद्याअपिचोत्तमाः ॥ ९१ ॥
अंशांशितायामपिचभेदोजीवेशयोर्यदि ॥ अंशांशितानोपपन्नाभिन्नत्वात्स्तम्भकुम्भ-
वत् ॥ ९२ ॥ किंचभेदंसमाश्रित्यतत्त्वमित्यत्रवाक्यके ॥ तस्यत्वमितिमाध्वोऽसौ-
समासंप्राहसादरम् ॥ ९३ ॥ समासोनैवयुक्तोऽयंयुष्मदर्थविशेष्यकः ॥ समासेऽपिच-

For Private and Personal Use Only

किंवात्रविधेयंब्रूहिसादरम् ॥ ९४ ॥ षष्ठ्यर्थश्चेत्समासेषुतादृग्बोधोनयुक्तिमान् ॥
अस्यर्थश्चेदपूर्वत्वंनतस्यास्तीतिसंस्मर ॥ ९५ ॥ तदित्यव्ययनिर्देशःषष्ठ्यर्थेचेन्नयु-
क्तिमान् ॥ निषादस्थपतिन्यायविरोधात्प्रथमाततः ॥ ९६ ॥ सआत्मातत्त्वमि-
त्यत्रनञश्छेदोनसाम्प्रतः ॥ प्रक्रान्तआत्माकथितस्तद्भिन्नत्वेत्वनात्मता ॥ ९७ ॥
सादृश्यंनसमस्तस्यनञोऽर्थःस्यात्तथैवचेत् ॥ अचन्द्रंमुखमित्यत्रनसादृश्यंप्रतीयते ॥
॥ ९८ ॥ अगौरितिपदाद्यद्वद्गोभिन्नोगोसदृग्भवेत् ॥ अतदित्यत्रतद्वत्स्यादितिचेद्वच-
नैरलम् ॥ ९९ ॥ भेदएवहिवाक्यार्थोनसादृश्यंतथापिहि ॥ अनात्मत्वेतुजीवस्य-
वाक्यमेतद्वृथाभवेत् ॥ ३०० ॥ अनात्माबोधयोग्यश्चकुत्रदृष्टस्त्वयावद ॥ अस्त्य-
ध्याहारपक्षेऽपिवाक्यभेदोऽपिगौरवम् ॥ १ ॥ तस्मादात्मानमेवावेदहंब्रह्मेतिवाक्यतः ।
विरोधात्सर्वविज्ञानविरोधादैक्यमेवहि ॥ २ ॥ वाक्यार्थोवर्णनीयस्तेनभेदस्तु-
कथञ्चन ॥ एकविज्ञानतःसर्वविज्ञानंप्रकृतंततः ॥ ३ ॥ तत्रप्रकरणेभेदकथानैवोप

For Private and Personal Use Only

युज्यते ॥ जडानामीश्वराभेदमुररीकुरुषेनवा ॥ ४ ॥ द्वितीयंभेदनिन्दायाःश्रुत-
त्वान्नहियुज्यते ॥ आद्येमुख्यममुख्यंवाऽभेदमंगीकरोषिहि ॥ ५ ॥ मुख्यंचेच्चि-
न्नमेतत्तुयज्जडाभेदकश्चिति ॥ बाधायाश्चेद्भेदहेतुर्नवास्तविकतामियात् ॥ ६ ॥
कथंजीवेशयोर्भेदोवास्तवःस्याद्विचारय ॥ वास्तवत्वेनिष्फलंस्यात्सतःसत्यवि-
शेषणम् ॥ ७ ॥ अतोविश्वमृषात्वाययुक्तंसत्यविशेषणम् ॥ दृष्टान्तेमृत्तिकेत्येव
सत्यमित्युक्तमित्यतः ॥ ८ ॥ दार्ष्टान्तिकेप्यधिष्ठानेयुक्तंसत्यविशेषणम् ॥ भेदहेतो
र्मृषात्वेनभेदोऽपिचमृषाभवेत् ॥ दुःखीजीवःकथंब्रह्मेतिचेद्विष्णुर्यथातव ॥ ९ ॥
वृन्दासीतावियोगाभ्यांदुःखित्वंश्रूयतेबहु ॥ तन्मिथ्याचेदिदंमिथ्याकुतोनभविता
वद ॥ अनयैवदिशाविज्ञःकर्तृत्वादिविचारयेत् ॥ ३१० ॥ अन्तर्नियन्तासर्वेशःकथं
जीवोभवेदिति ॥ नाशंक्यंनिष्प्रदेशान्तःस्थितेर्नियमनस्यच ॥ ११ ॥ असंभ-
वादतोजीवोपाधेरन्तर्नियामकः ॥ आकाशान्तर्नियंतृत्वंकार्यत्वात्सम्भवेद्यथा ॥ १२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटेमृत्तद्वदत्रापिनजीवेकार्यतानहि ॥ कार्यत्वेनास्तिकमतप्रविष्टस्त्वंविभासिमे ॥१३॥
प्रच्छन्नबौद्धाइतिचवृथाल्लोकान्विनिन्दसि ॥ अतोजीवेशयोर्भेदेनकश्चिद्धेतुरस्तिहि ॥
॥ १४ ॥ जडानामीशभेदश्चेत्सर्वज्ञानंनसिध्यति ॥ सत्यंभिदेतिवाक्यंतुनिर्मूलं-
धूर्त्तकल्पितम् ॥ ३१५ ॥ लब्धंचेदपिकुत्रापिनास्माकंकापिचक्षतिः ॥ ब्रह्मैवसत्य-
शब्दार्थःसत्यंज्ञानमितिश्रुतेः ॥ १६ ॥ तदभेदोभिदायाश्चसर्वंब्रह्मेतिवद्भवेत् ॥ ईश्व-
रोऽहमहंभोगीसिद्धोऽहंबलवान्सुखी ॥ १७ ॥ इत्यादिवचनैःस्मार्तानासुरान्मन्यतेऽ-
धमः ॥ ईश्वरोऽहमितिप्रज्ञावतामासुरतायदि ॥१८॥जीवंवास्तवभोक्तारंमन्वानस्या-
पितद्भवेत् ॥ ईश्वरोहमितिप्रज्ञावतीशेऽपितदापतेत् ॥ १९ ॥ ईशस्ययुक्तंजीवानाम-
युक्तंतत्कथंनुतत् ॥ जीवेश्वरैक्यमेतावदुक्तंकिंनश्रुतंत्वया ॥ २० ॥ लौकिकेश्वरता-
हन्तानिषेद्धुंवचनंहितत् ॥ २१ ॥ त्वामात्मानंपरंमत्वापरमात्मानमेवच ॥ आत्मा-
पुनर्बहिर्मृग्यअहोऽज्ञजनताज्ञता ॥ इत्थंब्रह्मापीशभेदंमन्वानंधिक्करोतिहि ॥ २२ ॥

For Private and Personal Use Only

यंसर्वाणिचनामानिबोधयन्तीतिमध्वकः॥ स्वीकृत्यनानाशक्तित्वंस्वीकरोतिहिशब्दके-
॥ २३ ॥ ईशसर्वात्मतायान्तुकस्माद्द्वेषोनविद्महे ॥ आनन्दमात्रावयवोऽनवद्यगुण-
सागरः ॥ २४ ॥ स्वगतेनचभेदेनवर्जितःपरमेश्वरः ॥ ब्रह्मावायुश्चतस्यैवप्रतिबिंबौ-
पुमाकृती ॥ २५ ॥ रमापियोषिदाकारःप्रतिबिंबोहरेरिति ॥ तारतम्यप्रक्रियायाम्बु-
बन्मध्वोऽत्रपृच्छ्यते ॥ २६ ॥ आनन्दावयवत्वेतुकथंनोनाशिताभवेत् ॥ यद्यत्सा-
वयवंवस्तुतत्तन्नाशीतिनिर्णयात् ॥ २७ ॥ नोचेन्नित्यत्वमस्माकंकोनिवारयितुंक्षमः॥
अस्मन्नित्यत्वमिष्टंचेत्किमीशेनकृतंतव ॥ २८ ॥ किंचस्वगतभेदेनवर्जितत्वंतुदुःश-
कम् ॥ अभेदोऽवयवानांचाथवावयवशून्यता ॥ २९ ॥ कोऽर्थःस्वगतभेदेनवर्जितत्व-
स्यतेमते ॥ आद्येहस्तक्रियापादेनेत्रेपादक्रियातथा॥ ३० ॥एवंसर्वक्रियाकर्ताप्रत्येकाव
यवोभवेत् ॥ तदनेकत्वक्लृप्तिस्तुव्यर्थास्यान्मध्वबुद्धिमन् ॥ ३१ ॥ यथास्यापानयो-
रैक्यंदिवसान्धपतत्रिषु ॥ हस्तत्वादिस्वरूपेणभेदश्चेत्केनभिन्नता ॥ ३२ ॥ आ-

नन्दत्वेनचेल्लोकेपार्थिवत्वेनभिन्नता ॥ नदृष्टातःकोविशेषोविष्णोःस्वाभेदसंश्रये ॥
॥ ३३ ॥ अथावयवशून्यत्वेप्रतिज्ञाहानिमाश्रय ॥ब्रह्मावायूरमाचेतिप्रतिबिंबाइति-
ब्रुवन् ॥ ३४ ॥ वदतुक्तत्वयादृष्टःप्रतिबिंबोऽयमीदृशः ॥ बिंबानुरूपतादृष्टातर्ह्येवप्र-
तिबिम्बता ॥ ३५ ॥ वचनानांबलाच्चेत्किंयूपआदित्यतामियात् ॥ यावत्स्या-
द्बिम्बसान्निध्यन्तावत्तुप्रतिबिम्बकः ॥ ३६ ॥ प्रतिक्षणव्यापृतानाम्ब्रह्मादीनांप्रति-
क्षणम् ॥ विष्णुविश्लेषतोनाशःप्रतिक्षणमहोभवेत् ॥ ३७ ॥ व्यापकत्वान्नविश्लेषइति-
चेदिहदर्पणे ॥ प्रत्तिबिम्बस्त्वयाकेनहेतुनाविनिवार्यते ॥ ३८ ॥ मुक्तावप्येवमेवैते-
ब्रह्माद्यास्तारतम्यतः ॥ तिष्ठंतितवसिद्धान्तेमुक्त्याकिन्तैःसमर्जितम् ॥ ३९ ॥ दुःख-
हेतौतारतम्येकथंतेसुखभागिनः ॥ निष्कामत्वान्मुक्त्यवस्थानतेषांदुःखकारणम् ॥
॥ ४० ॥ इतिचेत्प्राङ्मुक्तितस्तेस्युस्तुल्याअस्मदादिभिः ॥ मुक्तावदुःखहेतुत्वात्तार-
तम्यंवृथेष्यते ॥ ४१ ॥ सूक्ष्मचिदचिद्विशिष्टंब्रह्मस्थूलचिदचिद्विशिष्टंब्रह्मजगत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूक्ष्मचिदचितोर्ब्रह्मशरीरत्वाद्ब्रह्माभेदोवास्तवः ॥ ३४२ ॥ इत्थंस्थूलयोरपिब्रह्माभे-
दः । अणुश्चिद्रूपोजीवः ॥ ब्रह्मशरीरत्वाद्ब्रह्माभिन्नःस्वरूपस्वभाववैलक्षण्याद्भिन्नाश्चैते
इतिरामानुजःप्राहतत्रैतच्चविचार्यते ॥ सर्वज्ञचितासूक्ष्मेचिदचितौअभिन्नेइतिवदताऽ
चिच्छब्दश्चिच्छब्दोवाकथंप्रयुज्यतेचिदभेदेऽचित्त्वाभावादचिदभेदेचित्त्वाभावाच्च ॥
प्रकाशतमसोरिवाभेदासम्भवाच्च ॥ अभेदेऽपिकारणत्वासम्भवात् तथाहि
सूक्ष्मचिदचिद्विशिष्टंब्रह्मजगत्कारणमितिवदतासूक्ष्म चिदचितोर्जगत्कारणतावच्छे-
दकत्वमंगीकृतंतत्रप्राथमिकमहत्तत्त्वपरिणामेसूक्ष्मत्वापगमात्कारणतावच्छेदकरूपा
भावात्कारणाभावादुत्तरपरिणामोनस्यात् ॥ चिदचिदनुवृत्तिवत्सूक्ष्मत्वस्याप्यनु-
वृत्तावुत्तरोत्तरकार्येस्थूलत्वासम्भवात्स्थूलचिदचिदात्मजगदित्युक्तिर्नसंगच्छेत ॥
तत्रस्थूलत्वासम्भवात् ॥ नचापेक्षिकंसूक्ष्मत्वंस्थूलत्वंचसमादायोत्तरोत्तरकारणता-
निर्वोढुंशक्याचरमकार्येब्रह्मत्वासम्भवात्सर्वंब्रह्मेतिवाक्यविरोधः ॥ निरपेक्षसू-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्ष्मत्वेनसापेक्षसूक्ष्मत्वस्यविरोधात्तत्सामानाधिकरण्येनतदुत्पत्तेरसम्भवात् ॥ किं-
चसापेक्षसूक्ष्मत्वस्यापिकार्यत्वान्निरपेक्षसूक्ष्मत्वानुप्रवेशस्यतत्रासम्भवात्सापेक्षसू-
क्ष्मत्वोत्पत्तिरेवनस्यात् ॥ तदभावेचतत्सामानाधिकरण्येनस्थूलत्वानुत्पत्तेर्जग-
दनुपपन्नंस्यात् ॥ किंचावयवोपचयंविनाप्राग्विद्यमानैरेवावयवैःस्थूलत्वासम्भ-
वात्स्वकारणावयवातिरिक्तावयवासम्भवाज्जगदनुपपन्नमेव ॥ किंचचिज्जडब्र-
ह्मवादिमतेऽचिदंशस्यैवपरिणामाज्जगत्कारणत्वंछत्रिन्यायेनसमुदायेऔपचारिकमा-
पतेत् ॥ आपन्नेचमुख्यकारणत्वंप्रकृतिशब्दवाच्येऽचिदंशेएवपर्यवसन्नम् ॥
पर्यवसन्नेचसांख्यमतादविशेषःअविशेषेचईक्षणाद्यसंभवाज्जगत्कारणत्वानुपपत्तिः ॥
अनुपपन्नेचछत्रिन्यायेनाप्युपचाराभावाद्ब्रह्मत्वासंभवः ॥ यदिशक्तित्वार्थंभिन्नांसत्तां-
नांगीकरोषितर्हिप्रकृतिर्ब्रह्मशक्तिरितिवदताब्रह्मत्वंचिदंशेएवांगीकृतंतत्रचिदभिन्नायाः
शक्तेरचित्त्वासंभवादचितःस्तंभकुंभादिवच्छक्तित्वासंभवात्केवलचिद्रूपत्वेस्वस्यस्वश-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्तित्वायोगाच्चानिर्वचनीयामायेयमेवेतिस्वस्यापिमायावादित्वादन्यान्यथार्थवक्तॄ-
न्विनिन्दन्कुतोनलज्जतिभवान् ॥ किंचजीवोपाधेःस्थूलस्यसर्वंब्रह्मेतिवाक्यसम-
न्वयायमुख्याभेदमंगीकुर्वतास्थूलचिदचितोरप्यभेदांगीकाराज्जीवब्रह्मैक्यंकुतोनस्वी
क्रियतेस्वीकृतेचनित्यमुक्तत्वादीश्वरस्यतदभेदाज्जीवस्यापिनित्यमुक्तत्वाद्बंधमिथ्यात्वं-
प्रसज्येत ॥ प्रसक्तेविश्वमिथ्यात्वंविनातदनुपपत्तिः ॥ अनुपपन्नत्वाद्विश्वमिथ्या-
त्वांगीकारेस्वमतादत्यंतंप्रच्युतोभवान् ॥ किंचस्थूलचिदचितोर्ब्रह्माभेदइत्यत्रस्थूल
विशेषणंचिदंशेवाऽचिदंशेवोभयत्रवासमन्वियात् ॥ चिदंशेवोभयत्रवानसम्भवतिप-
क्षद्वयेपिचिदंशेविकारापत्त्याजडत्वाज्जगदान्ध्यप्रसंगः ॥ अचिदंशेचेदप्यविकृतसूक्ष्म-
चितोजीवस्येश्वरस्यवाविकृतस्थूलाभेदस्याध्यासंविनानुपपन्नत्वान्मुख्याभेदोदूरनिर-
स्तः ॥ सूक्ष्माचिदंशस्यापिविकारिणोविकृतचिदभेदोमुख्योनुपपन्नः ॥ अनुपपन्ने-
भेदेऽभेदेचानिर्वचनीयख्यातिःसुस्थिरा ॥ किंचसर्वाणिनामानिचेतनस्यैवाचेतनेषु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अ० देहादिषुगौणानीतिवदतोदाशरथिरित्यादौचेतनेऽपत्यत्वस्यजन्यत्वव्याप्यस्यानुपप-
त्तिः ॥ तदुपपत्त्यर्थंजन्यत्वांगीकारेनास्तिकमतप्रवेशः ॥ देहगतंजन्यत्वंआत्मन्य- सा०
॥२०॥ ध्यस्ययदिशब्दप्रवृत्तिस्तदागौणत्वंगलेपतितम् ॥ चैत्रादिशब्दानांचैत्राद्यात्मन्येवमु-
ख्यवृत्तिंस्वीकुर्वतोद्वितीयचैत्रशब्दार्थआत्मोतान्यः । अन्यश्चेच्चेतननामतानस्यात् ॥२०॥
आत्माचेद्देवदत्तादिपर्यायतापत्तिः ॥ चैत्रदेहाद्युपलक्षितश्चेदत्रापिचैत्रदेहशब्दयोरात्म
नैवार्थवत्त्वान्नदेहोपस्थितिः ॥ देहशब्दस्यदेहेएववृत्त्यंगीकारेपिदेहत्वेनयावद्देहानामु
पलक्षणत्वेनपुनःपर्यायतापत्तिःचैत्रशब्दवैयर्थ्यापत्तिश्च ॥ चैत्रोहंजानामीतिप्रती-
त्यादेहात्मनोरभेदांगीकारप्रयासोनिष्फलःचैत्राहंशब्दयोरात्मनैकार्थ्यात् ॥ देहवा-
च्चित्वेत्वभेदद्वाराशब्दप्रवृत्तेर्गौणता ॥ परिणाम्यपरिणामिनोर्वास्तवाभेदासंभवादा-
ध्यासिकःसःवास्तवाभेदांगीकारेदेहनाशेऽनात्मत्वप्रसंगात् ॥ चिदंशपरिशेषेपितस्य
नात्मतास्यात् ॥ तवचिदचिदात्मवादित्वात् ॥ कस्यचिज्जडांशस्यपरिशेषेपिआंशि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कनाशस्यदुर्वारित्वात् ॥ यस्मिन्देशेदेहःपतेत्तत्रैवतिष्ठेद्यत्रघटस्तत्रमृद्वत् ॥ शुद्धचि
दंशस्यैवात्मतांगीकारेचैत्रोहंजानामीत्यादिप्रतीतिसहस्रेणाप्यभेदोदुःसाधः ॥ चै-
त्रोहंमरिष्यामीतिप्रतीत्याऽऽत्मनाशोप्यंगीकृतःस्यात् ॥ गतंतववैकुंठगमन-
मुपासनाफलम् ॥ ननुशरीरशरीरिणोःस्वरूपस्वभाववैलक्षण्याद्भेदोपितेनभवे
ल्लोकान्तरगमनमितिचेन्न ॥ भेदाभेदयोरन्यतरस्यावास्तवत्वापत्तेः ॥ वास्तवत्वे-
न्यतरबुद्धिरन्यतरबुद्धिंप्रतिबध्नीयात् ॥ अप्रतिबन्धकत्वेसर्वत्रसर्वबुद्धिप्रसंगः ॥
यथाशरीरशरीरिणोर्भेदेसत्यप्यभेदमंगीकरोषितथाघटपटयोरप्यभेदेकिंप्रतिबंधकंतव
भवेत् ॥ यथाप्रतीतितदंगीकारइतिचेत्किमयुक्तास्यान्मेरुःसर्षपइतिप्रतीतिः ॥ किंच
भेदाभेदयोःप्रतियोग्यभावरूपयोःसामानाधिकरण्येघटघटाभावयोरपिसामानाधिक-
रण्यंस्यात् ॥ किंचसर्वेशब्दाःप्रकृतिप्रत्यययोगेनाभिधायकतयाप्रसिद्धालोकेतत्त-
द्वाच्यतयाप्रतीयमानतत्तत्संस्थानवद्वस्तुमुखेनतदभिमानिजीवतदंतर्यामिपर्यंतसंबा-

तस्यवाचकाइत्यपिवदताशब्दशक्तिपर्याप्तिःकिंदेहजीवपरमात्मसमुदायेउतप्रत्येकस्मि-
न्अथवाऽन्यतमेअथवान्यतमेष्वेकस्मिन्एकस्मिन्नपिकिंदेहेउतजीवेऽथांतर्यामिणि ॥
आद्येतत्तद्वाच्यतयेत्यसंगतंआद्यपक्षत्रयेतत्तत्संस्थानवद्वस्तुमुखेनेत्यसंगतम् ॥ चतुर्थे
शक्यतावच्छेदकाभाववद्वाचकत्वापत्तिः ॥ चित्रमेतदन्यशक्त्यान्यप्रतीतिरिति ॥
परमात्मवाचित्वेदेहजीवयोःशब्दादप्रतीत्यापत्तिःदेहजीवान्यतरवाचकत्वपक्षेपिस्वेत-
रान्यतरप्रतीत्यनापत्तिः ॥ देहादीनांप्रकारत्वेकृष्णश्चैत्रइत्यादौएकदेशान्वयापत्तिः ॥
जीवःसंसारीत्यत्रजीवशब्दस्यजीवान्तर्यामिवाचकत्वेनपरमात्मनिसंसारित्वप्रतीत्याप-
त्तिः ॥ अन्यथाएकदेशान्वयापत्तिरुक्तैव ॥ जीवशब्देंतर्यामिविनिर्मोकेणशक्त्यंगी-
कारेसर्वेशब्दाःपरमात्मवाचकाइतिप्रतिज्ञाहानिः ॥ लक्षणापक्षेत्वनन्तस्थललक्षणा-
पेक्षयापरमात्मनिशक्तित्यागएवयुक्तः ॥ अतश्चैत्रादिशब्दानांदेहएवजीवशब्दस्यभो
क्तृचैतन्यएवघटादिशब्दानांतत्तत्संस्थानेएवपरमात्मादिशब्दानांपरमात्मन्येवशक्ति-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्युक्ता । किञ्चजीवस्यब्रह्मशरीरतयाब्रह्मात्मत्वंवदतातत्त्वमसीत्यत्रतत्पदंनिरस्तसमस्त-दोषमनवधिकातिशयासंख्येयकल्याणगुणास्पदंजगदुदयविभवलयलीलंब्रह्मप्रतिपादयति ॥ समानाधिकरणंत्वंपदंचाचिद्विशिष्टंजीवशरीरंब्रह्माचष्टेइतिपदद्वयार्थनिर्णीय प्रकारद्वयविशिष्टैकपरत्वात्सामानाधिकरण्यस्येतिजीवान्तर्यामिब्रह्मणोजगत्कारणब्र-ह्माभेदःकथितस्तन्मन्दप्रज्ञरमणीयम् ॥ त्वंपदस्यजीवान्तर्यामिवाचकत्वाभावात् ॥ अन्यथात्वंमूर्खइत्यादौब्रह्मणोमूर्खत्वापत्तेः ॥ अन्तर्यामिणःसम्बोध्यत्वाभावादसि-पदासंगत्यापत्तेः ॥ श्वेतकेतुजीवस्यैवसम्बोध्यत्वात् ॥ किञ्चशरीरशरीरिणोरभेदवा-दिनःकिंप्रतिबन्धकंतत्त्वमसीत्यत्रैवजीवब्रह्मैक्यबोधे ॥ किञ्चनिरवयवचिद्रूपस्यजीव-स्यान्तःप्रदेशासम्भवात्तदन्तर्यामित्वंब्रह्मणोनसंगच्छते ॥ प्रदेशवत्येवपदार्थान्तरप्र-वेशसम्भवात् ॥ अंतर्यामित्वेपिनजीवशरीरत्वंब्रह्मणः ॥ यथानमणिशरीरत्वंमाला-सूत्रस्य ॥ किञ्चतत्त्वमसीत्युपदेशवाक्यंउपदेशोह्यज्ञाननिवृत्तयेभवतिनाज्ञानंब्रह्मणि

For Private and Personal Use Only

त्वयाभ्युपगम्यतेयेनायमुपदेशःसफलीक्रियेत ॥ नापिजीवेभावरूपमज्ञानमंगीक्रिय-
तेनाभावरूपमज्ञानंसंभवतिज्ञानवतिज्ञानाभावायोगात् ॥ नचोत्पन्नज्ञानवत्त्वेनाभाव
॥२२॥ उपपादयितुंशक्यः ॥ नहिज्ञानरूपआत्माज्ञानान्तरमपेक्षेतविषयंप्रकाशयितुंयथा
नदीपोदीपान्तरम् ॥ यदिस्वरूपज्ञानस्यदीपस्यवाविषयप्रकाशनसामर्थ्याभावःतर्हि
तन्नज्ञानंनापिदीपः ॥ किञ्चात्मसमवेतंज्ञानंज्ञानांतरसापेक्षंविषयप्रकाशनाक्षमंवाज्ञा-
नत्वादात्मज्ञानवदित्यनुमानेनानवस्थाजगदांध्ययोःप्रसंगात् ॥ विषयप्रकाशक्षमत्वे-
नज्ञानांतरापेक्षाज्ञानांतरापेक्षत्वेविषयप्रकाशाक्षमत्वमित्यन्योन्यविरोधाज्ज्ञानरूपत्वं
ज्ञानवत्त्वंचनसिध्येत्तस्माद्भावरूपमज्ञानंज्ञानसामान्याविरोधिप्रमाबाध्यंस्वकार्यपरी-
क्षाबाध्यंवाजीवेस्तीतिभवतेष्टव्यम् ॥ तस्यैवतत्त्वमसीत्युपदेशः ॥ तदेवतत्त्वावेदक
वेदांतशास्त्रसाफल्यम् ॥ नह्यज्ञाननिवृत्तिमंतरेणभूतार्थवेदनस्यकिञ्चित्प्रयोजनंसंभ ॥२२॥
वति ॥ किञ्चचिद्रूपाणांजीवात्मनामसंकुचितापरिच्छिन्ननिर्मलज्ञानरूपाणामनादि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मरूपाविद्यावेष्टितानांतत्तत्कर्मानुरूपज्ञानसंकोचविकासौइत्युक्तंतत्रस्वरूपभूतज्ञाने ऽसंकुचितापरिछिन्नेतिविशेषणाभ्यांविभुत्वंनित्यत्वंचांगीकृतंतच्चआराग्रमात्रःपुरुष— एषोणुरात्माचेतसावेदितव्यःबालाग्रशतभागस्येत्यादिश्रुतिभिरणुजीवांगीकारेणविरु- ध्यते ॥ नह्यणुर्जीवोऽसंकुचितापरिछिन्नज्ञानरूपोभवितुंयुक्तः ॥ किंचयदविद्यायाः कर्मरूपत्वमुच्यतेतदपिनयुज्यते ॥ नहिशुक्तिसाक्षात्कारस्यशुक्त्यावरककर्मनाशक- त्वंयुज्यते ॥ अप्रायश्चित्तत्वात् ॥ तदंगीकारेपिनयावज्ज्ञानंसंभवतियेनयावदविद्या- नाशःस्यात् ॥ पदार्थानामानंत्यात् ॥ अनिर्मोक्षप्रसंगः॥ नापिज्ञानसंकोचविकासावु- पपद्येते॥ परिणामित्वेनजडत्वप्रसंगात् ॥ किञ्चमायांतुप्रकृतिंविद्यादजामेकामित्या- दिनामायाप्रकृत्यजाशब्दवाच्यस्यपरास्यशक्तिर्विविधैवश्रूयतइतिश्रुत्याशक्तित्वमंगी- कृत्यापिब्रह्मशरीरत्वमुच्यते ॥ तदसत् ॥ नहिवन्हिशक्तेर्वन्हिशरीरत्वंदृष्टम् ॥ अ- स्तुवाशरीरंतथापिब्रह्मापिस्वशरीरभूतंप्रधानंतथातथापरिणमय्यस्वस्वभावमजहदेव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रतत्रवर्तमानंसत्त्वांतांसंज्ञांलभतइत्युक्तंनसंगच्छते ॥ ब्रह्मशरीरसूक्ष्माचिद्वाचक-
प्रधानशब्दस्यब्रह्मण्येवमुख्यतयाप्रवृत्तत्वात्परिणामस्यापितत्रैवमुख्यतयाप्रतीत्याप-
त्त्यास्वस्वभावमजहदित्ययुक्तंस्यात् ॥ नहिपरिणममानंकूटस्थमजडंवादृष्टचरम् ॥
स्वस्वभावमित्यत्रैकःस्वशब्दोधिकः ॥ अन्यत्रपरिणामांगीकारेपिकार्याणांस्वोपादाने
एवाभेदान्नचिद्वस्तुनिब्रह्मणि ॥ ब्रह्मशरीरत्वाद्ब्रह्माभेदइतिचेच्छरीरंशरीरीचेतिवस्तुद्व
यंएकंवा ॥ आद्येवस्तुद्वयमभेदश्चेतिविरुद्धम् ॥ द्वितीयेचिदचिदीश्वररूपतत्त्वत्रयग-
णनाप्रतिपक्षीभवेत् ॥ चिदचितोरीश्वरशरीरत्वात्तदभेदेनेश्वरैकतत्त्वापत्तेः ॥ किञ्चा
नश्नन्नन्योअभिचाकशीतीतिमन्त्रवर्णादभोक्तुर्भोगोपाधिभूतशरीरकल्पनायाअयुक्त-
त्वात् ॥ यस्यात्माशरीरमित्यादितूपासनार्थमितिमन्तव्यम् ॥ यत्तुरंगाचार्येणसर्व
स्यजगतोब्रह्मशरीरत्वाच्छरीरवाचकानांशरीरिण्येवमुख्यतयाप्रवृत्तिदर्शनात्सर्वंखल्वि
तिसामानाधिकरण्यनिर्देशोयुक्तइत्युक्त्वाग्रेसूक्ष्मचिदचिद्विशिष्टब्रह्मरूपकारणवाचि-

For Private and Personal Use Only

ब्रह्मपदेनस्थूलचिदचिद्विशिष्टब्रह्मरूपकार्यवाचिसर्वपदस्यसामानाधिकरण्यंकार्यकारणयोरभेदबोधकंमुख्यमेवोपपन्नतरमित्युक्तंतत्तुरंगहेषणंनतुमानुषभाषणम् ॥ कार्यकारणयोरभेदेशरीरवाचकानांशरीरिणिमुख्यप्रवृत्तिदर्शनहेतुकथनासामंजस्यात् ॥ तादृशशब्दप्रवृत्त्यापिस्थूलचिदचिद्विशिष्टब्रह्मणः सूक्ष्मचिदचिद्विशिष्टब्रह्माभेदोबुद्धःस्यान्नतुकार्यप्रपंचस्यब्रह्माभेदःसिध्येत् ॥ तच्छरीरत्वात्तदभेदइतिचेत्कार्यकारणयोरभेदबोधकमितिकथनंनयुक्ततामर्हति । किञ्चस्थूलचिदचिद्विशिष्टब्रह्मणएवप्रपंचत्वादित्युक्तंतत्रकिन्नामब्रह्मत्त्वंसर्वज्ञचित्वंउतसूक्ष्मचिदचिद्विशिष्टतादृशचित्त्वंअथवास्थूलतद्विशिष्टतादृशचित्त्वम् ॥ आद्येनतस्यकार्यत्वंसिद्धत्वात्अविकारित्वात् ॥ द्वितीयेस्थूलतद्विशिष्टेऽव्याप्तेःतृतीयेसूक्ष्मतद्विशिष्टेअव्याप्तेः ॥ किंचसत्यंज्ञानमनंतंब्रह्मेतिलक्षणवाक्येनसूक्ष्मचिदचितोर्विशेषणतागम्यतेयेनतद्विशिष्टेब्रह्मतात्वन्मतास्यात् ॥ नहिशब्दादप्रतीयमानवैशिष्ट्यंवक्तुंशक्यम् ॥ विशिष्टेब्रह्मत्वेपिकार्यावस्थायांब्रह्म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषणेचिदचिदंशेसूक्ष्मत्वाभावेनब्रह्मपदेनान्वयितावच्छेदकरूपेणानुपस्थितेःसर्वंब्र-
ह्मेतिवाक्यमनन्वितंतत्वभवेत् ॥ सुवर्णकुंडलमित्यादौकुण्डलावस्थायामपिसुवर्ण-
त्वस्यान्वयितावच्छेदकस्यसत्त्वादन्वयोपपत्तिः ॥ दुग्धंदधीत्यत्रदुग्धत्वोपलक्षितंद्र-
व्यंदुग्धशब्दार्थः ॥ इत्थंसूक्ष्मचिदचितोरुपलक्षणत्वेसर्वज्ञचैतन्यस्यैवकारणत्वाद्वि-
कारापत्तिः ॥ यत्तुरंगाचार्यःजगद्ब्रह्मणोःशरीरशरीरिभावेद्वेवावब्रह्मणोरूपेमूर्तंचामू-
र्तंचेतिश्रुतिमाहतदयुक्तम् ॥ ब्रह्मत्वसामानाधिकरण्येनमूर्तत्वामूर्तत्वयोर्विधाना-
द्गंधस्यद्वेरूपेपूतिःसुरभिश्चेतिवाक्याद्गंधद्वैविध्यवद्ब्रह्मद्वैविध्यापत्तेः ॥ नत्वन्यतर-
स्यमिथ्यात्वंत्वदिष्टंयेनैकमेवाद्वितीयमित्यविरुद्धंस्यात् ॥ यत्तुजडभागस्यमिथ्याभू-
तस्यसर्वशब्दार्थत्वेब्रह्मस्वरूपतादात्म्यासम्भवइत्युक्तंतन्न ॥ चोरस्थाणुन्यायेनत-
त्सम्भवात् ॥ यत्तुयावत्कृत्स्नंब्रह्मात्मकमितिवेदांतार्थज्ञानंसम्यङ्जायतेतावद्विशेष-
णेष्वेवमुख्यवृत्तिरितितत्तुच्छम् ॥ सम्यग्ज्ञानोत्तरंशक्तिग्रहस्तदुत्तरंसर्वंब्रह्मेतिवाक्या-

For Private and Personal Use Only

र्थबोधात्सम्यग्ज्ञानमित्यन्योन्याश्रयात् ॥ यत्तुजगद्व्यापारवर्जमितिबादराय-
णसूत्रमवलंब्यमोक्षदशायामपिव्यापाराव्यापाराभ्यांजीवब्रह्मणोर्भेदंब्रूतेतन्न ॥ जग-
द्व्यापारकर्तृतावच्छेदकंब्रह्मत्वंनजविन्मुक्तत्वमितितदर्थसंभवात् ॥ यत्तुसत्यसंकल्पा-
दिगुणकतयाननिर्गुणंब्रह्मेतितन्न ॥ जगत्सत्यत्वेएवतदुपपत्त्यातदभावात्तदभावः ॥
यत्तुकेवलवाक्यार्थज्ञानंनमोक्षोपायः सहसैवमोक्षप्रसंगात्किंतूपासनाकर्मसहितमिति
तन्न ॥ वाक्यार्थज्ञानेनाज्ञानेनिवृत्तेमोक्षेकिंप्रतिबंधकंभवेत् ॥ नहिवाक्याद्रज्ज्वधिगमे-
सर्पभयनिवृत्तौकिंचित्प्रतिबंधकंदृष्टचरं ॥ देहात्मनोरभेदवादित्वान्नास्तिकाग्रेसरचक्रव-
र्तिनश्चार्वाकस्यापि मतमनादेयतरं।तस्मादेतन्मतंविहायकेवलकापिलप्रवेशेपिननिस्तारः।
तत्रजगत्कारणंप्रकृतिरितिस्थितं ॥ तत्रप्रकृतिशब्दस्यकारणवाचित्वात्स्वातिरिक्तकार्य-
संभवात्स्वस्यस्वकारणत्वायोगात्स्वस्यान्यस्यवाकारणमितिविकल्पासहिष्णुत्वात्प्रकृ-
तिशब्दोनुपपन्नः॥अप्रकृतौजगत्कारणत्वमनुपपन्नमेव ॥प्रधानशब्दवाच्यत्वमप्यप्रकृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेरेवस्यात् ॥ किंचगुणत्रयसाम्यावस्थायाःप्रकृतित्वांगीकाराद्विकृत्यवस्थायांप्रकृतित्वाभावात्प्रकृतिविकृत्योरभेदइत्ययुक्तंस्यात्।कपालावस्थायांपिंडावस्थायाइवोत्तरोत्तरपरिणामेपूर्वावस्थायानाशेपंचविंशतित्वंतत्त्वानामसमंजसंस्यात्॥माध्यमिकपरिणामैःसंख्यापूर्तिश्चेद्भवेत्संख्यापूर्तिर्नतूपलभ्येरन्॥प्रकृतेःसावयवत्वेनयत्किंचिदवच्छेदेनयत्किञ्चित्परिणामेमहदादीनांप्रकृतिविकृतित्वंदुर्निरूपं।पूर्वावस्थामविनाश्यैवोत्तरकार्यांगीकारेऽयमेवविवर्त्तइत्यलंपल्लवीभावेनवाचां ॥ विवर्तपक्षेतुसर्वस्याध्यासिकत्वेनाध्यस्तस्याधिष्ठानैकरस्येनैकरसेप्रमाणप्रमेयकार्यकारणादिव्यवहारस्यसुतरामनुपपन्नत्वादनुपपन्नस्यजगतआत्मनःस्वप्रकाशस्यवाचिंतायाअयुक्तत्वान्नैश्चित्यमेवविवेकसिद्धंपरमब्रह्मनिष्ठांमन्यंतेब्रह्मवादिनः ॥ अध्यस्तस्यजगतोधिष्ठानातिरेकेणसत्वासंभवादध्यासस्यात्मनोन्यत्रासंभवादेतदुभयविज्ञानेनात्मैकत्वविज्ञानेनित्यमुक्तत्वमित्यत्रश्रुतिस्मृतीरुदाहरामः ॥ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि। संपश्यन्ब्रह्म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमंयातिनान्येनहेतुना ॥ यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति । सर्वभूतेषुचा-
त्मानंततोनविजुगुप्सते ॥ यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः । तत्रकोमोहःकः
शोकएकत्वमनुपश्यतः ॥ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि । ईक्षतेयोगयुक्ता-
त्मासर्वत्रसमदर्शनः ॥ योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति । तस्याहंनप्रणश्यामि
सचमेनप्रणश्यति ॥ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि । संपश्यन्नात्मयाजीवै
स्वाराज्यमधिगच्छतीति ॥ अध्यस्तस्यजगतोधिष्ठानसन्मात्रत्वेनजलंतरंगेणरज्जुर्भु-
जंगेनसूर्यकिरणाःकुरंगजलेनेवनस्पृश्यतेअधिष्ठानसन्मात्रआत्माजगता ॥ अतएवा-
संगोह्ययंपुरुषइतिश्रुतिः ॥नित्यासंगत्वेननित्यमुक्तेपरमात्मनिजीवन्मुक्तिविदेहमुक्तीभ्र
मः सचज्ञानपरिपाकतारतम्येनविभातितच्चज्ञानंप्रमाणप्रमेयादिव्यवहारासंभवादध्य-
स्तत्वेनाध्यस्तस्याविद्यामयत्वेनाविद्यायाःस्वप्रकाशचिदेकरसेऽहमितिप्रथमानेनावृते-
ऽसंभवात्स्वातिरिक्तस्यकस्यचिदप्यसंभवादहमेवाहमितिसहजविश्रांतिः ॥ तत्साध-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नंचनिखिलवेदबीजस्ययावद्वाक्प्रपंचसारस्यतारस्यार्थविचारः यद्विचारेणयावंतोवेदा विचारिताभवंतियदध्ययनेनाधीताभवंतियज्जपेनजप्ताभवंतियेनप्राणवंतोभवंतियद-नुसंधानेनयतयोंतेमुक्ताभवंतियज्जपमात्रेणब्रह्मलोकमारोहंतियदुपासनयासर्वेप्युपा-सिताभवंतियन्माहात्म्यवर्णनेशेषप्रभृतयोविकुंठिताभवंतियदर्थविचारेणबुद्धिमन्तो मुक्तास्तिष्ठंति ॥ तदर्थस्तु अखंडैकरसंब्रह्मैव ॥ तत्रप्रणवस्यचत्वारिपदानिताएव मात्राउच्यंतेतत्रप्रथममात्रायाविश्वविराट्शब्दवाच्योनिखिलःस्थूलप्रपंचस्तद्द्रष्टाचा र्थः ॥ द्वितीयमात्रायास्तैजसहिरण्यगर्भशब्दवाच्यःस्वाप्नःसूक्ष्मःप्रपंचोद्रष्टाचार्थः ॥ तृतीयमात्रायाअव्याकृतशब्दवाच्यमूलाविद्यातदनुभविताचार्थः ॥ अर्धमात्रारूप-स्योंकारस्यनांतःप्रज्ञमित्यादिनिषिद्धसकलविशेषमहमितिसामान्यतःप्रथमानमनुभ-वमात्रंतुरीयमर्थः ॥ अनुभूयमानस्यांतःप्रज्ञत्वादेर्निषेधेप्यात्मानुभवस्यनिषेधायो-गात् ॥ तत्रस्थूलप्रपंचस्यप्रथममात्रार्थस्यद्वितीयमात्रार्थेसूक्ष्मेप्रातिभासिकेऽभेदेना-

For Private and Personal Use Only

न्वयः तस्यद्रष्टापिविश्वः सूक्ष्मद्रष्टरितैजसेऽभेदेनान्वेति ॥ सूक्ष्मस्यप्रातिभासिकस्य सौषुप्तेमूलाज्ञानेऽभेदान्वयः तैजसस्यापिमूलाविद्यानुभवितरिप्राज्ञेऽभेदेन ॥ सौषुप्त-मूलाविद्यायाश्चनांतः प्रज्ञमित्यादिलक्षितेतुरीयेबाधसामानाधिकरण्येनतत्रैवप्राज्ञस्य मुख्यसामानाधिकरण्येन ॥ स्थूलस्यस्वाप्नाभेदेनप्रातिभासिकत्वापादनेनप्रातिभा-सिकस्याविद्यामयत्वेनाविद्यायाः एकरसेब्रह्मणिकथमप्यसंभवादसंभवाविद्यस्वप्रकाश-तुरीयाभेदेनावस्थात्रयानुभवितुरसंगनित्यमुक्तत्वमितिविशिष्टवाक्यार्थः ॥ त्रयआ-वसथास्त्रयः स्वप्नाः अयमात्माब्रह्मसर्वानुभूः असंगोह्ययंपुरुषइत्यादिश्रुतिभ्यः ॥ अ-वच्छेदकोपाधाववच्छिन्नेचैतन्येचखंडशः शक्त्यंगीकारात्पृथगन्वयेपिनक्षतिः ॥ भाग त्यागलक्षणयाऽवच्छिन्नत्वांशपरित्यागेनशुद्धचिदंशस्यापितुर्यान्वयोनविरुध्यते ॥ स्वकार्यपरीक्षयाऽविद्यायानष्टत्वादविद्याकार्याणांपूर्वमेवबाधितत्वात्स्वयंप्रकाशसच्चि-दानंदसामान्येतुरीयेऽदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्यय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सारमितिलक्षितेबुद्धेरप्रवेशात्सर्वचिंतांपरिहायतूष्णीमवस्थानंवाक्यार्थबोधस्वरूपंफ-
लंच ॥ ननुअदृष्टमित्यादिविशेषणैरुक्तेपिवृत्तिव्याप्त्यभावेएकात्मप्रत्ययसारमिति
विशेषणेनावश्यकोवृत्तिव्याप्त्यंगीकारः ॥ अतएवाविद्याबाधोपियुक्तःइतिचेन्न ॥
सूर्यकिरणेषुमृगजलवदध्यस्तयाबुद्ध्याधिष्ठानआत्मानविषयीकर्तुंशक्यते ॥ यथासू-
र्यकिरणाःस्वाध्यस्तजलैर्नशीतलीक्रियन्तेभिन्नसत्ताकत्वात् ॥ अतएवप्रतिबिम्बाभा-
सवादौनिराकृतौ ॥ नहिमृगजलेसूर्यप्रतिबिंबआभासोवासंभवति ॥ ननुअध्यस्त-
स्याप्याकाशनीलिम्नःप्रतिबिंबदर्शनाद्भिन्नसत्तायामपिबुद्धौवास्तवसतोप्यात्मनःप्रति-
बिंबाभासौसंभवेतामितिचेन्न ॥ आकाशनीलिम्नःसोपाधिकभ्रमत्वेनाप्रलयमनिवृत्ते-
र्व्यावहारिकतुल्यत्वेनव्यावहारिकत्वेनैववासमसत्ताकत्वेनप्रतिबिंबःअतएवनमृगजले
तत्प्रतिबिंबोदृष्टः ॥ ननुवृत्तिव्याप्त्यनंगीकारेऽविद्याबाधोनुपपन्नइतिचेन्न ॥ यत्र-
विषयविषयिभावोवास्तवस्स्यात्तत्रविषययाथार्थ्यज्ञानेनाविद्यायायापनंयुक्तंयत्रतुवि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षयविषयिभावोऽविद्ययाकल्पितस्तत्रविषयत्वासंभवादविद्यायाःस्वकार्यासंभवदर्शने-
नैवनाशइत्यभ्युपगंतव्यं ॥ अतएवान्यदेवतद्विदितादथोअविदितादधीतिश्रुत्यावि-
द्याविद्याविषयत्वंनिरस्तंसंगच्छते ॥ यदिहिकार्यंनामकिंचिदुपपन्नंभवेत्तदातत्कार-
णाभ्युपगमोपिसुतरामुपपन्नोभवेत् यदातुकार्यमधिष्ठानमंतरेणनप्रतिभातिस्वतश्वस्व-
रूपंनकिंचिद्विंदतितस्यकार्यत्वासंभवेनकारणाभ्युपगमस्यानवकाशात्कार्यकारणबु-
द्ध्यनुदयएवाविद्यानाशःकार्यसहितइत्युच्यते।यथायदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छु-
क्लंतदपांयत्कृष्णंतदन्नस्यतदपागादग्नेरग्नित्वंइत्यत्राग्निपरीक्षायामग्नेरसंभवादग्न्या-
पादकाविद्यानाशस्तथाकार्यमात्रेसत्ताप्रकाशयोर्ब्रह्ममात्रत्वेऽसदप्रकाशस्यशशशृंगतु
ल्यस्यकार्यस्यआपादकाऽविद्यानाशः ॥ अविद्याऽसंभवएवाविद्यानाशउच्यते ॥ अ-
तएवअविद्यास्तीत्यविद्यायामेवास्तित्वप्रकल्पनमितिसुरेश्वराः ॥ अविद्याकार्येसत्ये-
वाविद्याकल्पनमितितदर्थः ॥ एतावताऽविद्यानाशार्थंवृत्तिव्याप्त्यंगीकारोनिष्फलः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अंगीकृतायामप्यसंभवस्तस्याइतिफलितं ॥ अप्रमेयंपरंध्रुवमितिश्रुतेः ॥ मानंप्रबोधयंतंबोधंमानेनयेबुभुत्संते । एधोभिरेवदहनंदग्धुंवांच्छंतितेमहात्मानइत्याचार्याः ॥ यतोवाचोनिवर्तंतइतिश्रुतिव्याख्यावसरेस्वस्मिन्स्वप्रवेशायोगादित्यानंदगिरयः ॥ किञ्चब्रह्मणस्तुरीयस्यनिराकारत्वाद्बुद्धिप्रत्यक्त्वाच्चबुद्धेर्ब्रह्माकारत्वंनामाकारपरित्याग एवपर्यवस्यतिसाचनवृत्तिःकुतस्तरांवृत्तिव्याप्तिः ॥ ननुतथात्वेब्रह्मबोधोनस्यादितिचेन्न ॥ स्वयंबोधरूपस्यनबोधान्तराकांक्षाकिन्तुबोधयोगेनभासमानेषुबोधभेदनिरासेबोधःस्वमात्रोवतिष्ठते ॥ अतएववेदान्तवचनानिविषयविमुखीकरणार्थानीति भाष्यम् ॥ सतिभेदग्रहेविषयसांमुख्यस्यदुर्वारत्वान्निरस्तेचभेदेस्वमात्रत्वेनविषयसांमुख्यासम्भवात्प्रत्यग्विश्रांतिरार्थिकीतितात्पर्यम् । अत्रतुविश्वतैजसयोःप्राज्ञेस्थूलसूक्ष्मयोःकारणेचाभेदमवगाह्यविशिष्टप्रणवार्थेतुरीयेऽवस्थात्रयभावाभावसाक्षिणिस्वयमहमात्मानिजमित्यादिशब्दितेऽभेदाकांक्षावत्तामालोक्यतत्संगमसमयेतेनतुरीयेणव्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मातुरीयमेवभवतिबुद्धिःशब्दश्च॥ यथावन्हियन्त्रमषीप्रज्वलितवन्हिसंगमसमयेएवव-
न्हिर्भवतिनस्वरूपेणतिष्ठतिनापिवन्हिंव्याप्नोतिनाप्युत्थास्यति ॥ तथाचभाष्यम् ॥
क्षीणेतुमकारेबीजभावक्षयादमात्रे ॐकारेगतिर्नविद्यतेक्वचिदित्यर्थःअमात्रोमात्रायस्य
नास्तिसोमात्रॐकारश्चतुर्थस्तुरीयआत्मैवकेवलोभिधानाभिधेयरूपयोर्वाङ्मनसयोः
क्षीणत्वादव्यवहार्यःप्रपंचोपशमः शिवोद्वैतःसंवृत्तःएवंयथोक्तविज्ञानवताप्रयुक्तॐका-
रस्त्रिमात्रस्त्रिपादआत्मैवसंविशत्यात्मनास्वेनैवस्वंपारमार्थिकमात्मानंयएवंवेद॥परमा-
र्थदर्शिनांब्रह्मविदांतृतीयंबीजभावंदग्ध्वात्मानंप्रविष्टइतिनपुनर्जायतेतुरीयस्याबीज-
त्वात्नहिरज्जुसर्पविवेकेरज्ज्वांप्रविष्टःसर्पोबुद्धिसंस्कारात्पुनःपूर्ववत्तद्विवेकिनामुत्थास्य
तिमन्दमध्यमधियांतुप्रतिपन्नसाधकभावानांसन्मार्गगामिनांसन्यासिनांमात्राणांपा-
दानांचक्लृप्तसामान्यविदांयथावदुपास्यमान ॐकारोब्रह्मप्रतिपत्तयेआलम्बनीभव-
तीति ॥ मात्रात्रयस्यसविकल्पविश्वादिबोधनेनोपक्षीणत्वान्निर्विकल्पसमस्तोंकारस्या

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मात्रस्याव्यवहार्यप्रपंचोपशमाद्वयार्थेतुरीयेजाग्रतः स्वप्नाभेदेनमिथ्यात्वेतस्यसौषुप्ते
बीजेऽज्ञानेऽभेदेनाविद्यामात्रत्वेज्ञातेतेनैवाविद्यादाहेसमावेशःअविद्यादाहेसत्येवाधि-
ष्ठानसाक्षात्कारात् ॥ येतुअधिष्ठानसाक्षात्कारोत्तरमविद्यानाशमिच्छन्ति तेषां
सत्यावरणेसाक्षात्कारासंभवः ॥ आवरणसाक्षात्कारयोःसमकालिकत्वासम्भवात् ॥
यत्साक्षादपरोक्षादितिश्रुतेर्नित्यापरोक्षआत्मानस्वसाक्षात्कारेवृत्तिमभिलषतिकिंतुस्वा
ध्यस्तनिरासमात्रंमोक्षाय ॥ रज्जुरिवसर्पादिभिर्विकल्प्यमानास्थानत्रयआत्मैकएवां-
तःप्रज्ञादित्वेनविकल्प्यतेयदातदांतःप्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणव्यापारसमकाल-
मेवात्मन्यनर्थप्रपंचनिवृत्तिलक्षणं परिसमाप्तमिति तुरीयाधिगमेप्रमाणांतरंसाधनांतरं
वानमृग्यम्॥रज्जुसर्पविवेकसमकालइवरज्ज्वांसर्पनिवृत्तिफलेसतिरज्ज्वधिगमस्यत्या-
दिना।तस्मात्प्रतिषेधविज्ञानप्रमाणव्यापारसमकालैवात्मन्यध्यारोपितांतःप्रज्ञत्वाद्य-
नर्थनिवृत्तिरितिसिद्धमित्यन्तेनभाष्येणनांतःप्रज्ञमितिश्रुतिव्याख्यानपरेणस्पष्टीकृतं ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रज्जुसर्पस्थलेयोह्यविद्यानिवृत्त्युपायःसएवसाक्षात्कारोपायः तुरीयेतुअविद्यानिवृत्त्यु-पायस्यनसाक्षात्कारोपायत्वंतस्यैवनित्यसिद्धसाक्षात्कारस्वरूपत्वात् ॥ परंतुअवि-द्यानिवृत्त्युपायेतरोपायानपेक्षत्वंतुल्यमितिदृष्टांतसंगतिः ॥ ननुनित्यापरोक्षत्वेआव-रणासम्भवात्अविद्यासंभवइतिचेन्न ॥ आवरणासंभवेप्यहमात्मानंनजानामीतिप्र-तीत्यावरणाभिमानोत्पादकाऽविद्यासंभवात् ॥ सैवचयावद्विक्षेपहेतुःशास्त्रेणनिव-र्तनीया ॥ अस्तुनामशुक्तिरजतस्थलेशुक्तित्वांशमाच्छादयंतीरजतपरीक्षयाबाध्या च ॥ अत्रतुविषयत्वासंभवान्निर्विभागेतयाविषयत्वमध्यस्यात्मानंकथंलभेयमितियत-मानंप्रतिविषयत्वंनास्तीत्येवबोधनीयंनत्वंगीकरणीयंनापिकश्चिदंशआच्छादनीयःसं-भवतिनिर्विशेषत्वात् ॥ नचब्रह्मत्वमाच्छादितमितिवाच्यम् ॥ सर्वारोपाधिष्ठान त्वमपेक्ष्यब्रह्मशब्दप्रवृत्तेस्तस्यचाविद्यकत्वात् ॥ सिद्धमेतावताऽवस्थात्रयबाधेनतुरी-यविश्रांतिःप्रणवार्थविचारेणेति ॥ एकात्मप्रत्ययसारमित्यस्यतुएकःयावद्भेदशून्यः

For Private and Personal Use Only

आत्मप्रत्ययः आत्माभिन्नचित्प्रकाशःसारोयस्मिन्नित्यर्थः ॥ ननुएकजीववादेएकमुक्त्या सर्वमुक्तिप्रसंगाद्बंधमोक्षव्यवस्थानसिध्येदितिचेन्न ॥ इष्टापत्तेः । केनमुक्तेनजीवांतरंदृष्टमितितद्व्यवस्थागलेपतितास्यात् ॥ यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी । यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेरितिभगवतामुक्तेषुप्रपंचदर्शनाभावाभिधानात् नमुक्तेषुसाप्रसरति ॥ ननुजगद्व्यवस्थाऽभावेजीवन्मुक्तानांयथेष्टाचारप्रसंगःव्यवस्थायांचजगदुपपत्तिर्वक्तव्याउपपन्नेचजगतिमोक्षानवकाशप्रसंगइतिचेन्न ॥ जगद्व्यवस्थयासंत्रस्तोजगदतीतपदवीमारुरुक्षुर्मुमुक्षुरध्यात्मशास्त्रेप्रवृत्तस्तत्राकर्त्रात्मानंनिश्चित्यकथंजगद्व्यवस्थायांप्रवर्तेतययायथेष्टाचारश्चपरिहर्तव्योभवेत् ॥ ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः । सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरइत्युद्धवंप्रतिभगवदुक्तेर्मुमुक्षुदशायामेवयदाविध्यगोचरत्वंकिमुवक्तव्यंजीवन्मुक्तानाम् ॥ किञ्चाप्तकामानांनेच्छासंभवोस्तियेनयथेष्टाचारआपादनीयः ॥ नापिशास्त्रस्येच्छास्तितदु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वेशेनविधेरदर्शनात् ॥ तवेच्छायास्त्वकिञ्चित्करत्वात् ॥ नापिज्ञानाज्ञानदशयोः प्रकृतिविकृतिभावोस्तियेनाज्ञानदशायांविहितानिकर्माणिज्ञानदशायामतिदिश्येरन् अकर्मत्वाज्ज्ञानदशायाः । नाप्यज्ञानेनाभिमतानिवर्णाश्रमादीनिज्ञानेप्यभिमत्यतथै-वाचरितव्यमितिनियमोस्तिनापिलोकनिंदानिवृत्त्यर्थमितिवक्तुंशक्यं । अनात्मज्ञलो-कानांमूर्खेषुगणनात् ॥ अविद्यायामंतरेवर्तमानाःस्वयंधीराःपंडितंमन्यमानाः॥ जंघ-न्यमानाःपरियंतिमूढाअंधेनैवनीयमानायथांधाइतिश्रुतेस्तन्निंदायाअप्रयोजकत्वात् ॥ आत्मज्ञेषुतुनिंदास्तुत्योरसंभवात् ॥ किंचसंसारदुःखसंत्रस्तस्याखंडनिरतिशयसुख-लाभेतत्राखंडविश्रांतिरेवार्थिकीनसदाचारोनाचारोवातमाक्रमितुंशक्तः ॥ कदाचिद्वि-श्रांतिप्रतिबंधेपुनःपुनःप्रणवार्थविचारेणविश्वमिथ्यात्वंनिश्चित्यात्मविश्रांतिः संपाद-नीयाइत्यपिवक्तुमशक्यम्॥ यथाहवसिष्ठः । चिद्द्योमैकांतनिष्ठत्वात्प्रयत्नेनविना-सुखम् । नवेत्तिशुद्धबोधात्मायःसविश्रांतउच्यते ॥ सर्वएवपरिक्षीणाःसंदेहायस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्तुतः । सर्वार्थेषुविवेकेनसविश्रातःपरेपदे ॥ यस्यकस्मिंश्चिदप्यर्थेक्वचिद्रसिकता-
स्तिनो । व्यवहारवतोप्यंतःसविश्रांतउदाहृतः ॥ यस्यसर्वेसमारंभाःकामसंकल्पव-
र्जिताः । यथाप्राप्तंविहरतःसविश्रांतइतिस्मृतः ॥ अनिमीलितनेत्रस्ययस्यविश्वंप्रली-
यते । सक्षीवःपरमार्थेनहाशेतेसुखमात्मवान् ॥ विनिर्गीर्यजगत्सर्वंपरमांपूर्णतांगतः ।
आतृप्तेरमृतंपीत्वाहाशेतेसुखमात्मवान्इत्यादि ॥तत्रविदितवेद्यस्यात्मैकरसिकत्वेनप्र-
पंचोपेक्षयाऽऽत्मविश्रांतिरेवस्वभावइतितात्पर्यम् ॥ नत्वाचाराभिनिवेशः। अतएव
नैवतस्यकृतेनार्थइत्यादिभगवानपि । अज्ञआचारमेवप्रशंसतिज्ञानेसंदिहानआचारं-
ब्रह्मज्ञानंच।परिनिष्ठितस्तुअसंदिग्धंबोधमेवपरीक्षते ॥परिनिष्ठितत्वंचअनिकेतत्वकुसं-
गशुभाशुभकर्मपरित्यागयथाप्राप्तसंतोषयथार्थगुणग्रहणपरदोषानीक्षणगुरुवचनानु-
संधानप्रतिपालनाद्भवति ॥ सनिकेतेममत्वंदोषःकुसंगेचित्तक्षोभःकर्मणिकर्तृत्वाभि-
मानःअसंतोषेइच्छावृद्धिःगुणाग्रहणेमात्सर्यंदोषदर्शनेनीचत्वंगुरुवचनाननुसंधानेज्ञा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नविस्मृतिः ॥ अदृढप्रतिपत्तौअनिकेतत्वादयोदृढप्रतिपत्तयेभवंति । दृढप्रतिपत्तौ
तुनकिञ्चित्कर्तव्यम् ॥ कृतकृत्यस्थितिरेषाप्रत्यग्विश्रांतिमेत्यशयनंयत् । व्युत्थाने
सर्वस्मिन्समतारसिताचनीरसत्वंच ॥ वस्तुतस्तुनकर्मलिप्यतेनरेनकर्मणालिप्यतेपा-
पकेननकर्मणावर्धतेनोकनीयानित्यादिश्रुतिभिरात्मनःकर्मलेपाभावेप्यभिनिवेशमा-
त्रमज्ञानांकर्मणिफलेच । अतएवनकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरि-
तिश्रुतिरभिनिवेशत्यागंमोक्षहेतुंबोधयतिस्वरूपतःसर्वथात्यागासंभवात् ॥ नहिकेन-
चिज्जीवतापाषाणीभवितुंशक्यते ॥ अतएवदेहेंद्रियादिषुसत्यसतिवाकर्मणिप्रवृत्ते-
ष्वपिविदुषिनहर्षशोकौ ॥ एवंहवावनतपतिकिमहंसाधुनाकरवंकिमहंपापमकरवमि-
तिश्रुतेः । तथाचविश्वमिथ्यात्वज्ञानंविनाकर्मफलहर्षशोकस्पर्शाभावस्यकथमप्युप-
पादयितुमशक्यत्वान्मिथ्यावस्तुनोन्यसत्तयासत्तावतःस्वतःशशशृंगतुल्यस्यान्यस-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तयासत्तावदित्यपिवक्तुमशक्यस्यव्यवहारविषयत्वासंभवान्निर्विषयत्वात्प्रमाणानांस्व-
तस्तुच्छत्वाच्चप्रमाणनिरपेक्षमद्वैतसाम्राज्यंसिद्धमितिशिवम् ॥ जयसच्चिदानंद ॥ ॥

अद्वैतसाम्राज्यमिदंतुकाश्यांखव्योमनागेंदुमितेशकेच ।
माघेऽसितेभूतदिनेचकारकृष्णोमुनिस्तुष्टिकृतेबुधानाम् ॥ १ ॥

इतिश्रीमत्परमहंसपरिव्राजकाचार्यसच्चिदानन्दसरस्वतीचरणकमलमकरन्दास्वा-
दसंतृप्तमनोमिलिन्दकृष्णानन्दसरस्वतीविरचितमद्वैतसाम्राज्यंसम्पूर्णम् ॥ शुभम् ॥

त्रिपाठीत्युपाह्वसुज्ञजनशिखामणिबहुराजमान्यमनःसुखरामतनुजेनतनुसुखरामशास्त्रिणा, कामतोपाह्व-
हरिशास्त्रिणाच संशोधितम्

मुम्बय्यां हरिवरदाख्ये मुद्रणालये बाबाजीअनन्तप्रभुतेण्डुलकरैर्मुद्रायंत्रालयाधिपतिभिर्मुद्रितोऽयं ग्रन्थः
पौषेऽसितेद्वादश्यांभौमे शालिवाहन शके १८१३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इत्यद्वैतसाम्राज्यंसंपूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only